अथैतयो कृष्णाजिनपुष्करपर्णयो युगपदभिमर्शन विधत्ते— "अथैनेऽभिमृशतीति * । शक्यत्वादुभयोर्युगपदालम्भनम् । "सञ्ज्ञा मिति । समानसञ्ज्ञम् 'एतत्' एतेन अभिमर्शनेन 'करोति' ज्ञातवान् भवति । तत्र मन्त्रद्वय विधत्ते— "शर्म च स्थ इति † । कृष्णाजिन पुष्करपर्णे सम्बोध्ये । 'शर्म' शरण 'च' 'स्थ ', युवयोरुपरि निधीयमानस्य मृत्पिण्डस्य 'शरण' भवथ , 'वर्म' कवच 'च' अस्य 'स्थ ' भवथ । 'अच्छिद्रे' छिद्ररहिते 'बहुले' महाप्राणे 'उभे' युवा व्यचस्वती' आकाशवन्यौ भूत्वा 'सवसाथाम्' आच्छादयता मृदम् । वसेराच्छादनार्थस्य ‡ रूपम् । 'पुरीष्य पशव्यम अग्निम्' 'बिभृतम्' । भृञो लोटि बहुलवचनाद् द्विर्वचनाभाव । एतयो शरणत्व कवचत्वम् । मृत्पिण्ड मुद्दिश्य व्याचष्टे— "शर्म च स्थस्मै ते वर्म चेति ॥ १० ॥

"सवसाथा मिति § । 'समीची' समञ्चने, युवा कृष्णाजिनपुष्करपर्णे 'उरसा' हृदयेन विज्ञानेन , 'आत्मना' अवयवसंस्थानेन च 'सवसाथाम्' सञ्छादयताम् 'एन' मृद्रूप मग्निम् । किमर्थम् ? 'स्वर्विदा' स्वर्गलाभाद्धेतो 'अजस्रम्' अनुपक्षीणम् 'इत्' एव 'ज्योतिष्मन्तम्' तेजस्विनम् 'अग्निम्', 'अन्तर्' युवयोर्मध्यप्रदेशे 'भरिष्यन्ती' धारयमाणे भवेता मिति शेष ॥

द्वितीयमन्त्रस्योत्तरार्द्ध ‖ व्याचष्टे— "असौ वा आदित्य इति ॥ ११ ॥

---

* "अथैन मभिमृशतीति"—इति सायणभाष्यधृतपाठ ।

† वा० स० ११ ३०, ३१ ।

‡ अदा० आ० १३ धा० ।

§ वा० स० ११ ३१ क । ‖ वा० स० ११, ३२ ख ।

- अभिमर्शनमन्त्रगता छिलसञ्ज्ञा यजमानाभिरूपेण प्रशस्ति— "द्वाभ्या मिति, व्याख्यातम् * ॥ १२ ॥ २ [४ १] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
षष्ठकाण्डे चतुर्थाध्याये प्रथमं ब्राह्मणम् ॥

(अथ द्वितीय ब्राह्मणम्)

अथ मृत्पिण्ड मभिमृशति । पुरीष्यो ऽसीति पशव्यो ऽसीत्येतद्विश्वम्भरा इत्येष हीद्ँ सर्व्वं बिभर्त्यथर्व्वा त्वा प्रथमो निरमन्थदग्न ऽइति प्राणो वा ऽअथर्वा प्राणो वा ऽएत मग्रे निरमन्थत्तद्यो-ऽसावग्रे ऽग्निरसृज्यत सोऽसीति तदाह त मेवैन मेतत् करोति † ॥ १ ॥

अथैन परिगृह्णाति ‡ । अभ्र्या च दक्षिणतो हस्तेन च हस्तेनैवोत्तरतस्त्वा मग्ने पुष्करादध्य-

---

* २६६ पृ० ३ पं० द्रष्टव्यमिति ॥

† 'करोति'—इति ख । 'करोति'—इति ङ ।

‡ 'परिगृह्णाति'—इति क, ङ ।

थर्व्वा निरमन्थतेत्यापो वै पुष्करं प्राणो ऽथर्व्वा प्राणो वा ऽएत मग्रेऽद्भ्यो निरमन्थन् मूर्ध्नो विश्वस्य व्वाघत इत्यस्य सर्व्वस्य मूर्द्ध इत्येतत् * ॥ २ ॥

त मु त्वा दध्यङ्ङृषिः। पुत्र ईधे ऽअथर्व्वण इति व्वाग्वै दध्यङ्ङाथर्व्वणः स एनं तत ऐन्द्ध व्वृत्रहणं पुरन्दर मिति पाप्मा वै वृत्रः पाप्महनं पुरन्दर मित्येतत् † ॥ ३ ॥

त मु त्वा पाथ्यो व्वृषा। समीधे दस्युहन्तम मिति मनो वै पाथ्यो वृषा स एनं तत ऐन्द्ध धनञ्जयꣳ रणेरण ऽइति यथैव यजुस्तथा बन्धुः ॥ ४ ॥

गायत्रीभि। प्राणो गायत्री प्राण मेवास्मिन्नेतद्दधाति तिसृभिस्त्रयो वै प्राणाः प्राण उदानो व्यानस्तानेवास्मिन्नेतद्दधाति तासां नव पदानि नव वै प्राणाः सप्त शीर्षन्नवाञ्चौ द्वौ तानेवास्मिन्नेतद्दधाति ॥ ५ ॥

---

* 'इत्येतत'—इति ग घ।

† मित्येतत – इति ग, घ।

अथैते त्रिष्टुभा उत्तरे भवतः। आत्मा वै त्रिष्टुबात्मानमेवास्यैताभ्याꣳ संस्करोति सीद होतः स्व उ लोके चिकित्वानित्यग्निर्वै होता तस्यैष स्वो लोको यत् कृष्णाजिनं चिकित्वानिति विद्वानित्येतत् सादया यज्ञꣳ सुकृतस्य योनाविति कृष्णाजिनं वै सुकृतस्य योनिर्देवावीर्देवान् हविषा यजासीति देव सन् देवानवन् हविषा यजासीत्येतदग्ने बृहद्यजमाने वयो धा इति यजमानायाशिषमाशास्ते ॥ ६ ॥

नि होता होतृषदने विदान इति। अग्निर्वै होता कृष्णाजिनꣳ होतृषदनं विदान इति विद्वानित्येतत्त्वेषो दीदिवाꣳ२॥ असदत् सुदक्ष इति त्वेषो दीप्यमानो ऽसदत् सुदक्ष इत्येतददब्धव्रतप्रमतिर्वसिष्ठ इत्यदब्धव्रत प्रमतिर्ह्येष वसिष्ठः सहस्रम्भरः शुचिजिह्वो ऽग्निरिति सर्वं वै सहस्रꣳ सर्वम्भरः शुचिजिह्वो ऽग्निरित्येतद् द्वाभ्यामाग्नेयीभ्यां त्रिष्टुब्भ्यां तस्योक्तो बन्धुः ॥ ७ ॥

अथैषा बृहत्युत्तमा भवति। बृहतीं वा ऽएष सञ्चितो ऽभिसम्पद्यते यादृग्वै योनौ रेतः

सिच्यते तादृग् जायते तद्यदेता मत्र बृहती करोति तस्मादेष सञ्चितो बृहती मभिसम्पद्यते ॥ ८ ॥

सꣳसीदस्व महाꣳ२॥ऽअसीति। इद मेवै-तद् रेत सिक्तꣳ सꣳसादयति तस्माद्योनौ रेत. सिक्तꣳ सꣳसीदति शोचस्व देववीतम इति दीप्यस्व देववीतम इत्येतद्वि धूम मग्ने ऽअरुष मियेध्य सृज प्रशस्त दर्शत मिति यदा वा ऽएष समिध्यते ऽथैष धूम मरुष व्विसृजते दर्शत मिति ददृश ऽइव ह्येष * ॥ ६ ॥

ता षट् सम्पद्यन्ते। षडृतव सव्वत्सर॰ सव्वत्सरो ऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावत तद् भवति यद्देव सव्वत्सर मभिसम्पद्यते तद् बृहती मभिसम्पद्यते बृहती हि मव्वत्सरो द्वादश पौर्णमास्यो द्वादशाष्टका द्वादशामावास्यास्तत् षट्-त्रिꣳशत् षट्त्रिꣳशदक्षरा बृहती त दक्षिणात उदञ्च माहरति दक्षिणतो वा † ऽउदग्योनौ रेत॰

* 'ह्येव'—इति ग, ह्येव—इति घ।

† 'वा'—इति क।

सिच्यत ऽएषो ऽअग्नेतर्हि योनिरविच्छेद माहरति रेतसोऽविच्छेदाय ॥ १० ॥ ३ ॥

॥ इति तृतीयप्रपाठके तृतीय ब्राह्मणम् [४. २] ॥

कात्यायन — "पिण्ड पुरीष्योऽसीति, पाणिभ्या परिगृह्णा-त्येन दक्षिणोत्तराभ्या दक्षिण साभ्रिस्त्वा मग्न इति षड्भि सर्वा सकृद् हृत्वा, पुष्करपर्णे निदधाति' –इति *। "त्वा मग्ने"– इत्यादिभि षड्भि ऋग्भि † यावदपेक्षिता मृद 'सर्वा' 'सकृत्' एकवार मेव गृहीत्वा 'पुष्करपर्णे' निदध्यादिति। तदिद द्वितीयम्। प्रथमतो 'मृत्पिण्ड' "पुरीष्योऽसि"– इति मन्त्रेण ‡ आलभते, 'अथ' दक्षिणोत्तराभ्या 'पाणिभ्याम्' 'एन' 'परिगृह्णा-ति'। तत्र 'दक्षिण' हस्त 'साभ्रि' अभ्रिसहित, वामस्तु केवल'। अथ तद् ब्राह्मणेन विधीयते— "अथ मृत्पिण्ड मिति।

मृत्पिण्डाभिमर्शनयजुषोऽय मर्थ।— हे 'अग्ने।' त्वम् 'पुरीष्य' पशुहित' 'असि', 'विश्वभरा' भूलोकस्य सर्वस्य धारकश्च, चीयमानाग्नेर्विराड्रूपत्वात्। 'अथर्वा' अरणवान्, प्राण 'प्रथम' पूर्व त्वा 'निरमन्थत्' निर्मथितवान्। पुरीष्यो-ऽसीति सिद्धवत्कथनेन यदुक्तम्, तदुपपादयति—"पशव्योऽसीति। "प्राणो वा अथर्वा"–इत्यर्थवादोऽस्य सिद्धवदर्थकथनम्। "तद्

* का० श्रौ० सू० १६ २ २६, २७, ३ १।

† वा० स० ११ ३२ २—७।

‡ वा० स० ११ ३२, १।

योऽसौ अग्रेऽग्निरसृज्यत, सोऽसीतीति। पूर्वं योऽग्निः सृष्ट, त मेव पुरीष्योऽसीत्यनेनोक्तवान् भवतीत्यर्थ ॥ १ ॥

"अथैन मिति। 'परिगृह्णाति' मृत्पिण्ड धारयन् प्राङ्-मुखस्याध्वर्यो 'दक्षिणत' प्रदेशे वर्त्तमान, दक्षिणो हस्त साश्रि, उत्तरत केवल, ताभ्या पाणिभ्या धारयेत्।

ग्रहणमन्त्रान् विधत्ते—"त्वा मग्ने पुष्करादधि"-इत्यारभ्य *, "ता षट् सम्पद्यन्ते"-इत्यत † प्राक्तनेन। तत्राद्यास्तिस्रो गायत्र, त्रिष्टुभौ द्वे, षष्ठी बृहती।

"त्वा मग्ने"-इत्यस्याय मर्थ। हे 'अग्ने।' 'त्वाम्' 'अथर्वा' अरणशील प्राण, 'पुष्करात्' उदकात्, 'अधि'-शब्द पञ्चम्यर्थानुवादी, 'निरमन्थत'। अग्नि विशिनष्टि—"विश्वस्य वाघत इतीति। 'मूर्द्ध्न' मूर्द्धानम्। कर्म्मणि षष्ठी ॥

पुष्करायर्वपदयोरर्थ माह—"आपो वै पुष्कर प्राणोऽथर्वेति ॥ २ ॥

द्वितीया मृच विधत्ते—"त मु त्वा दध्यङिति ‡। 'अथर्वण पुत्र' 'दध्यङ्' नाम ऋषि 'वृत्रघ्न' वृत्रस्य पाप्मन हन्तारम्, 'पुरन्दर' असुरपुराणा दारयितारं 'त्वाम्' एव 'ईधे' दीपयति। "ञि इन्धी दीप्तौ' §, लिटि "इन्धिभवति-भ्याञ्च"-इति ‖ कित्वान्नलोप। "दध्यङ्ङाथर्वण इति। मधु-प्रवचनात् वाक्त्वेन श्रुति ॥ ३ ॥

---

* वा० स० ११ ३२ २।

† २१३ पृ० १० पङ्क्तिर्द्रष्टव्या।

‡ वा० स० ११ ३३।

§ रु० आ० १० धा०।

‖ पा० सू० १ २ ६।

तृतीया ऋच विधत्ते— "त मु त्वा पाथ्य इति *। पाथो-ऽन्नम्, तत्कार्यत्वात् तत्र भव 'पाथ्य'। "पाथोनदीभ्यां ड्यण्" †। बलम्। सर्वेन्द्रियानुग्राहक। 'पाथ्यो वृषा'–इति मन, उच्यते, "मनो वै पाथ्यो वृषा"–इति श्रुतौ ‡ व्याख्यानात्। स एव 'दस्युहन्तमम्' शत्रूणा मतिशयेन हन्तारम्, 'रणे' सङ्ग्रामे 'धनञ्जय' धनस्य जेतार 'त्वा' त्वा 'समीधे'। तृतीयपादो विस्प-ष्टार्थत्वात् व्याख्यातु नार्हतीत्याह— "यथैव यजु, तथैव बन्धुरिति ॥ ४ ॥

उक्ताना तिसृणा ऋचा गायत्रीच्छन्दस्त्व मनूद्य प्रशसति— "गायत्रीभि प्राण इति। गायत्र्या प्राणरूपत्व मुक्तम्। मन्त्रगतत्रित्वसङ्ख्या प्राणोदानव्यानात्मना प्रशसति— "तिसृभि स्त्रयो वै प्राणा इति। एकैकस्या गायत्र्या ऋच त्रयस्त्रय पादा। तासा नव प्राणान् सम्भूय नवप्राणात्मना प्रशसति— "तासा नव पदानि, नव वै प्राणा इति। एतेन मन्त्रत्रयेण मृत्पिण्डस्य परिग्रहे तस्या मृदि प्राणानेव सहितवान् भव-तीत्यर्थ ॥ ५ ॥

धारणमन्त्रेषु त्रिष्टुभावित्युक्तम्, तौ विधातु तद्गतं छन्द प्रशंसति— "अथैतस्त्रिष्टुभा ऽउत्तरे भवत इति। त्रिष्टुभ आत्म-रूपत्व प्रागुक्तम्, ताभ्या मन्त्राभ्यां धारणेन मृत्पिण्डस्यात्मान स्वरूप मेव सस्कृतवान् भवति ॥

---

* वा० स ११ ३४।

† पा० सू० ४ ४ ११।

‡ इहैव २११ पृ० ६ प० द्रष्टव्यम्।

त्रिष्टुभौ विधत्ते— "सीद होतरिति *। हे 'होतः' देवानां माह्वातः ! मृद्रूपाग्ने ! 'स्वे' स्वकीये कृष्णाजिने 'सीद' निषीद। 'चिकित्वान्' विद्वान्, अस्मदीयं कर्म जानन्, 'सुकृतस्य' सुष्टु क्रियमाणस्य कर्मणो 'योनौ' स्थाने 'यज्ञ' इय'। कृष्णाजिने विस्तीर्यमाणे व्रीह्या मवघात पेषणं सोमनिधानादिकञ्च भवतीति 'देवावी'। "अवितृस्तृतन्विभ्य ई" †। देवान् त्वं सपर्यन् 'हविषा 'अवन्' 'यजासि' यजते पञ्चमे लकारे रूपम्। हे 'अग्ने!' 'यजमाने' 'बृहत्' प्रभूतं 'वय' धनं 'धा' देहि ॥ ६ ॥

"निहोतेति ‡। मन्त्र प्रतिपाद्य मनूद्य व्याचष्टे— "अग्नि-र्वै होतेति। निहोतेति 'नि'-इत्युपसर्ग 'असदद्'-इति क्रियया सम्बध्यते, निषीदति। 'होता' आह्वाता योऽग्निः, 'होत्-षदने' अग्ने सदने कृष्णाजिने 'विदान' कर्म जानन्, 'त्वेष' "त्विष दीप्तौ" §, दीप्यमानः, 'दीदिवान्', 'सुदक्ष' सुदक्षः, साधु क्षिप्रकारी वा 'अदब्धव्रतप्रमति' अनुपहतकर्मविषय-प्रकृष्टमतिः, 'वसिष्ठ' वसुमत्तर', 'सहस्रम्भर' सर्वस्य भर्ता, यद्वा "हृग्रहोर्भः" ‖ सहस्रधा विक्रियमाण'। तथा चैतातान्रेयक (?) ब्राह्मणम्— "एष ह वा अस्य सहस्रं भरता यदेनं मेक सन्तं बहुधा विहरन्ति"-इति।

---

* वा० स० ११ ३५।

† उ० ३ पा० १५८ सू०।

‡ वा० स ११ ३५।

§ भ्वा० उ० १००९ धा०।

‖ पा० ८ २ ३२ सू० १ वा०।

अनयोर्ऋचोर्हिंत्वसङ्ख्याऽऽग्नेयत्रिष्टुप्स्तावकं ब्राह्मणं प्रतिदिशति— "तस्योक्तो बन्धुरिति। "आ त्वा जिघर्मीत्येताभ्यां व्यतिषक्ताभ्यां माहुतिद्वयं कार्यं मित्यत्र प्रकरणे "द्विपाद् यजमान इत्यादिना * ॥ ७ ॥

षष्ठी मृचं विधातुं तद्गतं बृहतीच्छन्दः प्रशंसति— "अथैषां बृहतीति। 'एषा' वक्ष्यमाणा। "बृहती वा एष इति। 'सचित अग्नि बृहतीम् अभिसम्पद्यते' सम्पत्यक्षरसङ्ख्याको भवति, यथाप्युत्तरत्र बृहतीसम्पत्तिराम्नास्यते †। सामान्येनाय सम्पत्तिप्रकार ,— संवत्सररूपोऽग्निरिति प्रागुक्तम् *, तत्र संवत्सरे द्वादश पौर्णमास्य , द्वादश कृष्णाष्टम्य , द्वादशामावास्या , ता षट्त्रिंशत् संवत्सरे धार्यमाणेऽग्नौ सम्पद्यन्ते , बृहत्यपि षट्त्रिंशदक्षरेति तत्साम्यम्।

एवन्तर्हि अग्निचयनकर्मान्ते सम्पत्तिर्वक्तव्येति चेत्, तत्राह— "याद्दग्वै योनाविति। 'योनौ याद्दग् रेत सिच्यते', 'ताद्दग्' एवोत्तर 'जायते'। अत इदानीं बीजभूतस्तद्रूपाग्ने बृहत्या धारणे बृहत्यात्मकत्व मेव तस्य सम्पादितवान् भवति ॥ ८ ॥

ता मृचं विधत्ते— "ससीदस्व महानिति। हे 'अग्ने।' तद्रूप। 'संसीदस्व' सम्यग् बीजात्मनावतिष्ठस्व, यतो 'महान्' त्वम् 'असि'। 'देववीतम' अतिशयेन हविषा देवानां तर्पयितृतम , त्वं 'शोचस्व' दीप्यस्व। हे 'मियेध्य' मेधो यज्ञ-

---

* पुरस्तात् (३ पृ० १ ब्रा० १६—२१ क०) द्रष्टव्यम्।

† अनुपदमेव दशमकण्डिकायां (२१९ , २१६ पृ०) द्रष्टव्यम्।

‡ वा० स० ११ ३७।

स्तदर्हतीति हे 'प्रशस्त' प्रकर्षेण स्तुत । अग्ने । 'दर्शतम्' दर्शनीयम्, 'अरुषम्' आरोचमान धूम 'विसृज' ॥

मन्त्र व्याचष्टे— "इद मेवैतदिति । उत्पत्स्यमानाग्ने रेतोरूपत्वात् मृत्पिण्डस्य बाहुभ्या धारण नाम, योनौ सिक्तस्य मुञ्च ससादन मित्यर्थ । 'धूम विसृज'–इति यदुक्तम्, तदुपपादयति— "यदा वा एष समिध्यत इति ॥ ९ ॥

परिग्रहणे विनियुक्ताना मन्त्राणा सङ्ख्या सम्भूय सवत्सरात्मात्मना प्रशसति— "ता षट् सम्पद्यन्त इति । प्रकारान्तरेण स्तोतु मनुवदति— "यद्वेव सवत्सर मिति । सवत्सरे तावद् द्वादश पौर्णमास्य, द्वादशाष्टका, द्वादशामावास्या, षट्त्रिंशत्सङ्ख्या सम्पद्यते, बृहत्या अपि षट्त्रिंशदक्षरत्वात् सवत्सरसञ्चितोऽग्नि बृहत्यात्मना सम्पद्यत इत्यर्थ ।

विधत्ते— "त दक्षिणत उदञ्च मिति । 'त' मृत्पिण्ड 'दक्षिणत' प्रदेशात् 'उदञ्च' उदङ्मुखम् आहरेत् । तत् प्रशसति— "दक्षिणतो वा इति । यतो लोके दक्षिणत स्थितेन पुरुषेण, वामविभागे स्थितया स्त्रिया "योनौ रेत सिच्यते', 'एतर्हि' इदानी मध्ये धार्यमाणस्याग्ने एष मृत्पिण्डो 'योनि' 'अविच्छेद' विच्छेदराहित्येन मृत्पिण्डाहरण कर्त्तव्यम्; 'रेतस' रेतोभूतस्याग्ने 'अविच्छेदाय' इति ॥ १० ॥ २ [४ २] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे

माध्यन्दिनशतपथब्राह्मणभाष्ये

षष्ठकाण्डे चतुर्थाध्याये द्वितीय ब्राह्मणम् ॥

———

(अथ तृतीय ब्राह्मणम्)

अथ तत्राप उपनिनयति । यद्वा ऽअस्यै क्षतं यद्विलिष्ट मद्भिर्वै तत् सन्धीयते ऽद्भिरेवास्या ऽएतत् क्षत व्विलिष्टᳫं सन्तनोति सन्दधाति ॥ १ ॥

अपो देवीरुपसृज । मधुमतीरयक्ष्माय प्रजाभ्य इति रसो वै मधु रसवतीरयक्ष्मत्वाय प्रजाभ्य इत्येतत्तासा मास्थानादुज्जिहता मोषधयः सुपिप्पला इत्यपां वा ऽआस्थानादुज्जिहत ऽओषधयः सु-पिप्पला' * ॥ २ ॥

अथैना व्वायुना सन्दधाति । यद्वा ऽअस्यै क्षतं यद्विलिष्ट व्वायुना वै तत् सन्धीयते व्वायुनैवास्या एतत् क्षत व्विलिष्टᳫं सन्तनोति सन्दधाति ॥ ३ ॥

सन्ते व्वायुर्मातरिश्वा दधात्विति । अयं वै व्वायुर्मातरिश्वा योऽयं पवत ऽउत्तानाया हृदयं यद्विकस्त मित्युत्तानाया ह्यस्या एतद्धृदयं व्विकस्तं यो देवानां चरसि प्राणथेनेत्येष हि सर्व्वेषा देवाना चरति प्राणथेन कस्मै देव व्वषडस्तु तुभ्य

* 'सुपिप्पला''—इति ग , घ ।

मिति प्रजापतिर्व्वै वाक्तस्मा ऽएवैतदिमां व्वषट् करोति नो ह्येतावत्यन्याहुतिरस्ति यथैषा * ॥ ४ ॥

अथैना दिग्भिः सन्दधाति। यद्वा ऽअस्यै यत यद्विलिष्टं दिग्भिर्व्वै तत् सन्धीयते दिग्भिरेवास्या एतत् यत व्विलिष्टꣳ सन्तनोति सन्दधाति स इमां चेमां च दिशौ सन्दधाति तस्मादेते दिशौ सꣳहिते ऽअथेमां चेमां च तस्माद्द्वेवैते सꣳहिते ऽइत्यग्रे ऽथेति अथेत्यथेति तद्यच्चित्रावृत्तद्धि देवत्रानयानया वै भेषजं क्रियते ऽनयैवैना मेतद् भिषज्यति † ॥ ५ ॥

अथ कृष्णाजिनं च पुष्करपर्णं च समुद्गृह्णाति। योनिर्व्वै पुष्कर पर्णं योन्यां तद् रेत सिक्तꣳ समुद्गृह्णाति तस्माद्योन्यां रेत सिक्तꣳ समुद्गृह्यते सुजातो ज्योतिषा सह शर्म व्वरूथ मामदत् स्वरिति सुजातो ह्यत्र ज्योतिषा सह शर्म चैतद्वरूथं च स्वमासीदति ‡ ॥ ६ ॥

---

* 'यथैषा'—इति ग, यथैषा—इति घ।

† भिषज्यति'—इति ख, ग, घ।

‡ '०सीदति—इति क, ख।

अथैन मुपनह्यति। योनौ तद्रेतो युनक्ति तस्माद्योनौ रेतो युक्तं न निष्पद्यते योक्त्रेण योक्त्रेण हि योग्यं युञ्जन्ति मौञ्जेन त्रिवृता तस्योक्तो बन्धुः ॥ ७ ॥

तत्पर्यस्यति। वासो ऽग्ने विश्वरूपᳪं संव्ययस्व विभावसविति वरुण्या वै यज्ञे रज्जुरवरुण्य मेवैनदेतत् कृत्वा यथा वासः परिधापये-देव परिधापयति * ॥ ८ ॥

अथैन मादायोत्तिष्ठति। असौ वा ऽआदित्य एषो ऽग्निरमुं तदादित्य मुत्थापयत्युदु तिष्ठ स्वध्व-रेत्यध्वरो वै यज्ञ उदु तिष्ठ सुयज्ञियेत्येतदवा नो देव्या धियेति या ते दैवी धीस्तया नो ऽवेत्ये-तद् दृशे च भासा बृहता सुशुक्वनिरिति दर्श-नाय च भासा बृहता सुशुक्वनिरित्येतदाग्ने याहि सुशस्तिभिरिति ये वोढारस्ते सुशस्तय आग्ने याहि वोढृभिरित्येतत् † ॥ ९ ॥

* 'परिधापयति'—इति ख।

† 'वोढृभिरित्येतत'—इति ग, घ।

अथैन मित ऊर्द्ध्वं प्राञ्चं प्रगृह्णाति। असौ वा ऽआदित्य एषो ऽग्निरमु तदादित्य मित ऊर्द्ध्वं प्राञ्च दधाति तस्मादसावादित्य इत ऊर्द्ध्वः प्राङ् धीयत ऽऊर्द्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सवितेति यथैव यजुस्तथा बन्धुरूर्द्ध्वो व्वाजस्य सनितेत्यूर्द्ध्वो वा ऽएष तिष्ठन्वाज मन्नᳪ सनोति यदञ्जिभिर्व्वाघद्भिर्व्विह्वयामह ऽइति रश्मयो वा ऽएतस्याञ्जयो व्वाघतस्तानेतदाह परोबाहु प्रगृह्णाति परोबाहु ह्येष इतो ऽथैन मुपावहरति त मुपावहृत्योपरि नाभि धारयति तस्योपरि बन्धुः ॥ १० ॥ ४ ॥

॥ इति तृतीयप्रपाठके चतुर्थं ब्राह्मणम् [४. ३] ॥

कात्यायन — "अप उत्सर्गेऽपनयत्यपो देवीरिति, सम्त इति वा त मपक्षिपति"–इति *। उदक निनयेत्। तद्विधत्ते— "अथ तत्राप उपनिनयतीति। 'अथ' अनन्तर 'तत्र' 'आप' 'निनयेत्' आसिञ्चेत्। तत् प्रशसति— "यद्वा अस्यै क्षत मिति। 'अस्यै' षष्ठ्यर्थं। पृथिव्या यत् 'क्षत' खण्डितम्, 'यत्' च 'विलिष्टम्', "लिश अल्पी भावे" † अल्प स्खलम्, 'तत्'

* का० श्रौ० सू० १६ ३ २, ३

† दि० आ० ७१ धा०।

सर्वं खननम् 'अद्भिः' 'सन्धीयते' जलसम्बन्धेन हि विषमं स्थलं सम भवति । तस्मादाप कुण्डे निषेया ॥ १ ॥

मन्त्र विधत्ते—"अपो देवीरिति *। अत्राग्नि सम्बोध्यते। 'प्रजाभ्य' प्रजानाम् 'अयक्ष्माय' यक्ष्माव्याधि तदभावाय, 'मधुमती' रसवती 'देवी' द्योतमाना' 'अप' 'उदकजम्' आविशत। आसा भूमिगताना मपाम् 'आस्थानात्' उदकसंसृष्टभूदेशात् 'सुपिप्पला' पिप्पल पक्व फलम्, सुफला, 'ओषधय' फलपाकान्ता शस्यादय उज्जिहत' उद्गच्छन्तु, रोहन्तु। "ओ हाङ् गतौ" †।

'अयक्ष्माय'-इति पद भावत्वेन व्याचष्टे— "अयक्ष्मत्वायेति ॥ २ ॥

अत्र सूत्रम्— "सन्त इति वा त मवक्षिपतीति ‡। "सन्ते-वायुर्मातरिश्वा"-इति मन्त्रेण § वायु मवक्षिपेत्, मन्त्रपाठेना-वटे वायु पूरयेत्। तदिद विधत्ते— "अथैना वायुना सन्द-धातीति। 'एना' खननभूमिम्। इदानी मुक्त (?) यद्वा अस्यै क्षत मिति। यथा लोके क्षत ध्वभ्र निम्नस्थल वायुना सन्धीयते। वायुसञ्चालितै पर्णादि काष्ठकादिक पूर्यते, एव मत्रापीति मन्तव्यम् ॥ ३ ॥

मन्त्र विधत्ते— "सन्ते वायुरिति। पूर्वोऽर्द्धर्च, पृथिवी-दैवत्य, उत्तरो वायव्य। 'उत्तानाया' उन्मुखतया विस्तृ-

---

* वा० सं० ११ २९ १ ।

† धु० भ्वा० ६ आ० ।

‡ का० श्रौ० सू० १६ ३ ६ ।

§ वा० सं० ११ ३९ ।

खाया 'ते' तव पृथिव्या 'यत्' 'हृदय' 'विकस्तम्' अवट-करणेन खातम्, तत् 'मातरिश्वा' मातरि अन्तरिक्षे श्वसिति पवते इति 'मातरिश्वा' वायु, 'सन्दधातु' सम्पूरयतु। उत्त-रार्द्धे वायु सम्बोध्योच्यते। 'य' च त्व 'देवानाम्' अग्न्यादीनां वागादिदेवानां वा 'प्राणथेन' प्राणत्वेन 'चरसि'। वायौ सति वागादीन्द्रियाणि चेष्टन्ते। हे 'देव' द्योतमान वायो। 'कस्मै' क प्रजापति, तद्रूपाय 'तुभ्य' 'वषट् अस्तु'। इय पृथिवी वषड्भूता भवतु। 'क' पदस्यार्थ माह— "प्रजापतिर्वै क"-इति। वषट्कारेणाहुति कार्येति कृत्वा प्रशसति— "नो हैता-वत्यन्याहुतिरिति। 'यथा' 'एषा' आहुति सन्धानकरी, एव मन्या नास्तीत्यर्थ ॥ ४ ॥

कात्यायन — "अनामिकया सवपति पुरस्तात् पश्चाद् दक्षिणत उत्तरतश्च"-इति *। अनामिकाङ्गुल्या अवटस्य पुरस्तात् प्राच्या दिश सकाशात् 'पासु' अवटे सवपेत्। एव प्रत्यगा-दिभ्य सकाशात् तद् विधत्ते— "अथैना दिग्भि सन्दधा-तीति। तत्र क्रम विधत्ते— "स इमा चेमा च दिशौ सन्द-धातीति। 'इमा मिमाम्' इत्यभिनयेन प्राक्प्रतीच्यौ दिशौ विवक्ष्येते। एतयोर्विवक्षाया कारण माह— 'एते दिशौ' 'स-हिते'। इम मिति लोकप्रसिद्धे प्राक्प्रतीच्याविति युज्येते, पुन. इमाश्च'-इत्यनेन दक्षिणोदीच्यौ दिशौ विवक्ष्येते। अत्रापि सहितत्व मेव कारणम्। अथ चतुर्दिश सन्धानप्रकार मभि-नयेन दर्शयति-- "इत्यग्रेऽथेति। 'इति' एवम् 'अग्रे' प्रथमं प्राची दिश मित्यर्थ। इतरदिक्क्रियापेक्षया 'अथेति'-पदत्रयम्।

---

* का० श्रौ० सू० १६ ३ ४।

त्सरत समापन प्रशंसति— "तद् दक्षिणावृदिति । 'तत्' कर्म दक्षिण मावृदावर्त्तन समापन यस्य तद् भवति । 'तद्' दक्षिणावर्त्तन कर्म 'देवत्रा' देवेषु भवतीत्यर्थ । ता चात्र- कारणभूता मङ्गुलि मभिनयेन दर्शयति— "अनयेति । 'अनया' अनामिकाङ्गुल्या, भेषज्यक्रियासाधनत्व मस्या अङ्गुले प्रसिद्ध मिति शब्दार्थ ॥ ५ ॥

अथास्तीर्णयो कृष्णाजिनपुष्करपर्णयो रूर्ध्वोद्ग्रहण विधत्ते— "अथ कृष्णाजिनच्चेति *। 'उद्ग्रहणम् ऊर्ध्वकरणम् । पुष्कर- पर्णस्य योनित्व प्रागुक्तम् †, तद् विधत्ते— "सुजात इति ‡ । 'ज्योतिषा' 'सह' सयुक्त , सुजातोऽय मग्नि 'वरूथ' वरणीय, 'स्व' स्वर्गाख्य, 'शर्म' शरण गृहम् 'आसदत्' आसीददिति । सदेर्लुङि च्लेरङि रूपम् ॥ ६ ॥

अथ कृष्णाजिनपुष्करपर्णयोरुद्गृहीतत्वात् विहृता मुञ्ज योक्त्रेण बध्नीयादिति विधत्ते— "अथैन मुपनह्यतीति § । "णह बन्धने" ‖ । "न निष्पद्यत इति । निष्पतीत्यर्थ । 'योक्त्रेण' दाम्ना 'योग्य' योजनीयम् , अज्ञाननादिबन्धनं च मौञ्जेन कार- णीयम् । "तत्र विहृत्"–इत्यत्र पूर्वं मुक्त ¶ ब्राह्मण मति- दिशति— "तस्यो बन्धुरिति ॥ ७ ॥

* का० श्रौ० सू० १६ २ ५ ।
† अस्या मेव कण्डिकायां (२२१ पृ० १२ प) द्रष्टव्यम् ।
‡ वा० स० ११ ४०, १ ।
§ का० श्रौ० सू० १६ २ ६ क ।
‖ दि० उ० ६० धा० ।
¶ २ प्र० ३ ब्रा० २७ का० (१३८ पृ०) द्रष्टव्यम् ।

पूर्वं मध्वरासभाजान् पशून् प्रस्तुत्य, ते मौञ्जीभिरभिधानी-भिरभिहिता भवन्तीत्यादिना, त्रिवृतो भवन्तीत्यनेन च रशना-विधान मुक्तम् *, अथ योक्त्रस्य समन्त्र वेष्टन विधत्ते— "तत् पर्यस्यति वास इति †। 'तत्' योक्त्र 'पर्यस्यति' परिवेष्टयति। हे 'विभावसो' दीप्तिभिर्वासयित !, दीप्तिधन ! वा, हे 'अग्ने !' 'विश्वरूप' विचित्ररूप 'वास' 'सव्ययस्व'। "व्येञ् सवरणे" ‡, परिधत्स्व। योक्त्रबन्धने वास सव्ययस्वेति वस्त्र-परिधापनोक्तेस्तात्पर्य माह— "वरुण्या वै यन्न इति। 'यन्त्रे' हि रज्जु' 'वरुण्या' वरुणदेवत्या भवति §। यथा— योक्त्रपरित्यागे "प्रत्वा मुञ्चामि वरुणस्य पाशात्"-इति ‖ मन्त्र, नैवम्, इह तु 'एतद्' योक्त्रम् 'अवरुण्य कृत्वा' 'यथा वास परिधापयेत्' 'एव' तदित्यभिप्रायेण "वास ०—० सव्ययस्वेत्युक्तम् ¶। पाशस्यैव हि वरुणो देवता, न वासस इत्यर्थ ॥ ८॥

विधत्ते— "अथैन मादायोत्तिष्ठतीति **। 'एन' मृत्पिण्ड मादाय उर्ध्वस्तिष्ठेत्। तत् प्रशसति— "असौ वा आदित्य इति। 'त्रेधात्मान विकरोति,— अग्नि तृतीय, वायु तृतीयम्, आदित्यं तृतीयम्"-इति श्रुते ††। मृत्पिण्डोऽग्निरिति चोक्तम्। मृद-मादायोत्थानेन अमु मादित्य मेवोत्थापितवान् भवतीति॥

---

* २ प्र० ३ ब्रा० २६, २७ क० (१३८ पृ०) द्रष्टव्यम्।

† का० श्रौ० सू० १६ ३ ६ ख।

‡ भ्वा० उ० १००७ धा०।

§ १ भा० २ प्र० ४ ब्रा० १२ कण्डिकायां द्रष्टव्यम्।

‖ ऋ० स० ८ अष्ट० ३ अ० २४ व० द्रष्टव्यम्।

¶ वा० सं० ११ ४० २।

** का० श्रौ० सू० १६ ३ ७। †† तै० ब्रा० १. ७. १ २।

मन्त्रं विधत्ते—§ "उदु तिष्ठ स्वध्वरेतीति *। हे 'स्वध्वर' सुयज्ञ। 'उत्तिष्ठ'। 'उ' शब्दोऽप्यर्थः। अपि च 'देव्या' देवसम्बन्धिन्या 'धिया' बुद्ध्या 'नः' अस्मान् 'अव' पालय। 'दृशे' दर्शनाय 'बृहता भासा' प्रौढेन तेजसा 'सुशुक्वनि' अत्यन्त दीप्यमान 'सुशस्तिभिः' शोभनशिक्षितैः 'वोढृभिः' अश्वैः 'आयाहि' आगच्छ 'अग्ने' मद्रूप इति। सुशस्तिभिरितिपदस्यार्थ माह— "ये वोढारस्ते सुशस्तय इति ॥ ९ ॥

अत्र सूत्रम्,— "ऊर्द्ध्वबाहु प्राञ्च प्रगृह्णाति, ऊर्द्ध्व ऊ षु ण इति, अवहृत्योपरि नाभिधारयन्निति †। तदूर्द्ध्वधारणं विधत्ते— "अथैन मित ऊर्द्ध्व मिति। 'इत' भूमेः सकाशात् 'ऊर्द्ध्व' प्राङ्मुख प्रगृह्णीयात्। "असौ वा आदित्य इत्यादि पूर्ववद् व्याख्येयम् ‡।

मन्त्रं विधत्ते— "इत ऊर्द्ध्व मिति। 'नः' अस्माकम् 'ऊतये' तर्पणाय सुष्ठु 'ऊर्द्ध्व' 'तिष्ठ'। तत्रोपमा माह— "देव इति। 'न' शब्द उपमार्थः। यथा सविता देवः 'वाजस्य' अन्नस्य 'सनिता' सम्भक्ता 'ऊर्द्ध्व' तिष्ठति। 'यद्' यस्मात् 'अञ्जिभिः' अभिव्यञ्जकैः 'वाघद्भिः' रश्मिभिः उपलक्षित त्वा 'विह्वयामहे' बहुविध माह्वयाम।

अत्र मन्त्रे § पूर्वार्द्धं निगदव्याख्यात मिति दर्शयति— "यथैव यजुः, तथा बन्धुरिति। उत्तरार्द्धे 'वाजस्य'—इत्यादे-

---

* वा० स० ११ ४१।

† का० श्रौ० सू० १६ ३ ८, ९ क।

‡ पूर्वत्र (२२७ पृ० १४ प०) द्रष्टव्यम्।

§ वा० स० ११ ४२।

रथं माह— "ऊर्द्ध्वो वा एष तिष्ठन्नित्यादिना। पूर्वं मित ऊर्द्धं मिति सामान्येनोक्तम्, तद् विशिनष्टि— "परोबाहु प्रगृह्णातीति। बाह्वो परस्तात् अनूर्द्ध्वौ बाहु, प्राञ्च मित्युद्गृह्णीत।

मृत्पिण्डस्याधो नयनं विधत्ते— "अथैन मुपावहरतीति। उपावहरणस्य अवधि दर्शयति— "त मुपावहृत्येति। उपरि-नाभिधारणस्य स्तावक ब्राह्मण मित्यतिदिशति— "तस्योपरि बन्धुरिति। रुक्मधारणप्रस्तावे "यद्देवोपरि नाभि अवाग् वै नाभे रेत प्रजातिरिति * •—• एतद्वै पशोमेध्यतर यदुपरि-नाभि"-इति † ॥ १० ॥ ४ [४ ३] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
षष्ठकाण्डे चतुर्थाध्याये तृतीय ब्राह्मणम् ॥

(अथ चतुर्थ ब्राह्मणम्)

हस्त ऽएष भवत्यथ पशूनभिमन्त्रयते। एतद्वा ऽएषु देवाः सम्भरिष्यन्त पुरस्ताद्वीर्य मदधुस्तथैवैष्वय मेतत् सम्भरिष्यन् पुरस्ताद्वीर्यं दधाति ॥ १ ॥

सो ऽश्व मभिमन्त्रयते। स जातो गर्भो ऽअसि

*, † उपरिष्टात् (५ प्र० २ ब्रा० ८, १० कं०) द्रष्टव्यम्।

रोदस्योरितीमे वै द्यावापृथिवी रोदसी तयो-
रेष जातो गर्भोऽग्ने चारुर्विभृत ओषधीष्विति
सर्वासु ह्येष चारुर्विभृत ओषधिषु चित्रः शिशुः
परि तमांसि अक्तूनिति चित्रो वा ऽएष शिशुः
परीत्य तमांस्यक्तूनतिरोचते प्र मातृभ्यो ऽअधि
कनिक्रदद्गा इत्योषधयो वा ऽएतस्य मातरस्ताभ्य
एष कनिक्रदत्प्रैति तदश्वे वीर्यं दधाति * ॥ २ ॥

अथ रासभम् । स्थिरो भव वीड्वङ्ग आशुर्भव
वाज्यर्वन्निति स्थिरश्च भव वीड्वङ्गश्चाशुश्च भव
वाजी चार्वन्नित्येतत् पृथुर्भव सुषदस्त्वमग्नेः
पुरीषवाहण इति पृथुर्भव सुशीमस्त्वमग्नेः पशव्य-
वाहन इत्येतत्तद्रासभे वीर्यं दधाति ॥ ३ ॥

अथाजम् । शिवो भव प्रजाभ्यो मानुषीभ्यस्त्व
मङ्गिर इत्यङ्गिरा वा ऽअग्निराग्नेयोऽजः शमय-
त्येवैनमेतदहिंसायै मा द्यावापृथिवी ऽअभि-
शोचीर्मान्तरिक्षं मा वनस्पतीनित्येतत् सर्वं मा
हिंसीरित्येतत्तदजे वीर्यं दधाति ॥ ४ ॥

* ‘दधाति’—इति क, ख

त्रिभिरभिमन्त्रयते । त्रिवृदग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवेष्वेतद्वीर्यं दधाति ॥ ५ ॥

अथैन मेतेषा पशूना मुपरिष्टात् प्रगृह्णाति । तदेन मेतै पशुभि सम्भरति नोपस्पृशति व्वज्रो वै पशवो रेत इद नेदिद७ रेतो व्वज्रेण हिनसानीत्यथो ऽअग्निरग्र पशव इमे नेदय मग्निरिमान् पशून् हिनसदिति ॥ ६ ॥

त मश्वस्योपरिष्टात् प्रगृह्णाति । प्रैतु व्वाजी कनिक्रददिति प्रैतु व्वाजी कनिक्रद्यमान इत्येतन्नानदद्रासभ. पत्त्वेति तदश्वस्य यजुषि रासभं निराह तद्रासभे शुचं दधाति भरन्नग्नि पुरीष्यं मा पाद्यायुषः पुरेति भरन्नग्निं पशव्यं मो ऽअस्मात् कर्मण. पुरा पादीत्येतत्तदेन मश्वेन सम्भरति ॥ ७ ॥

अथ रासभस्य । व्वृषाग्नि वृषण भरन्निति व्वृषा वा ऽअग्निर्वृषा रासभ. स वृषा वृषाणं भवत्यपाङ्गर्भ७ समुद्रिय मित्यपा७ ह्येष गर्भः समुद्रियस्तदेन७ रासभेन सम्भरति ॥ ८ ॥

अथापादत्ते * । अग्न ऽआयाहि वीतय ऽइ-त्यवितव ऽइत्येतत्तदेन ब्रह्मणा यजुषैतस्मात्क्षौद्रा-द्वर्षादुपादत्ते † ॥ ९ ॥

अथाजस्य । ऋतᳪं सत्यमृतᳪं सत्य मित्ययं वा ऽअग्निर्ऋत मसावादित्य सत्य यदि वासावृत-मयᳪं सत्य मुभयम्वेतदय मग्निस्तस्मादाहऽर्तᳪं सत्य-मृतᳪं सत्य मिति तदेन मजेन सम्भरति ॥ १० ॥

त्रिभिः सम्भरति । त्रिवृदग्निर्यावानग्निर्या-वत्यस्य मात्रा तावतैवैन मेतत् सम्भरति त्रिभि पुरस्तादभिमन्त्रयते तत् षट् तस्योक्तो बन्धु ॥ ११ ॥

अथैतान् पशूनावर्त्तयन्ति । तेषा मज प्रथम एत्यथ रासभो ऽथाश्वो ऽथैतो यता मश्वः प्रथम एत्यथ रासभो ऽथाजः क्षत्त्रं वा ऽअन्वश्वो वैश्य च शूद्रं चानु रासभो ब्राह्मण मज ‡ ॥ १२ ॥

तद्यदितो यताम् § । अश्वः प्रथम एति तस्मात्

---

* 'अथापादत्ते'—इति क, ख ।

† '०दुपादत्ते'—इति ग, घ ।

‡ 'मज '—इति ग, घ ।

§ 'यताम्'—इति ग, घ ।

क्षत्रियं प्रथम यन्त मितरे त्रयो व्वर्णाः पश्चादनु-यन्त्यथ यद्रमुत आयता मजः प्रथम एति तस्माद् ब्राह्मणः प्रथम यन्त मितरे त्रयो व्वर्णा पश्चादनु-यन्त्यथ यन्नैवेतो यना नामुतो रासभः प्रथम एति तस्मान्न कदा चन ब्राह्मणश्च क्षत्रियश्च व्वैश्य च शूद्र च पश्चादन्वितस्तस्मादेवं यन्त्यपापवस्य-सायाथो ब्रह्मणा चैवैतत् क्षत्रेण चैतौ व्वर्णा-वभित परिगृह्णीते ऽनपक्रमिणौ कुरुते * ॥ १३ ॥

अथानड्वापुरुष मीक्षते। अग्निं पुरीष्य मङ्गि-रस्वद्भराम इत्यग्निं पशव्य मग्निवद्भराम इत्येतस-देन मनड्वापुरुषेणा सम्भरति ॥ १४ ॥

त मजस्योपरिष्टात् प्रगृह्णन्नैति। आग्नेयो वा ऽअज स्वेनैवैन मेतदात्मना स्वया देवतया सम्भरत्यथो ब्रह्म वा ऽअजो ब्रह्मणैवैन मेतत् सम्भरति ॥ १५ ॥

अथैन मुपावहरति। ओषधय. प्रतिमोदध्व मग्नि मेतꣳ शिव मायन्त मभ्यत्र युष्मा इत्येतद्वैत-

* 'कुरुते'—इति क, ख।

स्मादायत ओषधयो बिभ्यति यद्वै नो ऽयं न हिꣳ-
स्यादिति ताभ्य एवैन मेतच्छमयति प्रज्ञेन मोद-
ध्वꣳ शिवो वो ऽभ्येति न वो हिꣳसिष्यतीति
व्यस्यन्विश्वा अनिरा अमीवा निषीदन्नो ऽअप
दुर्म्मतिं जहीति व्यस्यन्विश्वा अनिराश्चामीवाश्च
निषीदन्नो ऽप सर्व्वं पाप्मानं जहीत्येतत् * ॥ १६ ॥

ओषधय प्रतिगृह्णीत । पुष्पवती सुपिप्पला
इत्येतद्वैतासाꣳ समृद्धꣳ रूपं यत् पुष्पवत्य सुपि-
प्पला समृद्धा एनं प्रतिगृह्णीतेत्येतदयं वो गर्भ
ऋत्वियः प्रत्नꣳ सधस्थ मासददित्ययं वो गर्भ ऋत-
व्यः सनातनꣳ सधस्थ मासददित्येतत् † ॥ १७ ॥

द्वाभ्या मुपावहरति । द्विपाद्यजमानो यजमानो
ऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैन मेतदुपा-
वहरति तं दक्षिणत उदञ्च मुपावहरति तथोऽस्मो
ऽभ्युद्धृत मवोक्षित भवति यत्रैन मुपावहरत्युद्धते वा
ऽअवोक्षितेऽग्नि मादधति सिकता उपकीर्णा भवन्ति
तासा मुपरि बन्धुः ॥ १८ ॥

---

* 'जहीत्येतत्'—इति ग, घ ।

† 'सधस्थ मासददित्येतत्'—इति ग, घ ।

परिश्रित भवति। एतद्वै देवा अबिभयुर्यद्वै न इम मिह रक्षाᳪसि नाष्ट्रा न हन्युरिति तस्मा ऽएता पुरं पर्य्यश्रयस्तथैवास्मा ऽअय मेता पुर परि-श्रयत्यथो योनिर्व्वा ऽइयᳪ रेत इद तिर इव वै योनौ रेत सिच्यते योनिरूप मेतत् क्रियते तस्मादपि स्वया जायया तिर इवैव चिच-रिषति * ॥ १८ ॥

अथैनं व्विष्यति। तद्यदेवास्यावोपनद्धस्य सᳪ-शुच्यति ता मेवास्मादेतच्छुच बहिर्धा दधात्यथो ऽएतस्मा एवैन मेतद्योने प्रजनयति ॥ २० ॥

वि पाजसा पृथुना शोशुचान इति। वि पाजसा पृथुना दीप्यमान इत्येतद्बाधस्व द्विषो रक्षसो ऽअमीवा इति बाधस्व सर्व्वान् पाप्मन इत्ये-तत् सुशर्म्मणो बृहत शर्मणि स्या मग्नेरहᳪ सुह-वस्य प्रणीतावित्याशिष माशास्ते † ॥ २१ ॥

अथाजलोमान्याच्छिद्य ‡। उदीचः प्राचः

* 'चिचरिष्यति'—इति क।

† 'माशास्ते'—इति क ख।

‡ 'अथाजलोमान्याच्छिद्य'—इति क, ग, घ।

पशून् प्रसृजत्येषा ह्योभयेषां देवमनुष्याणां दिग्य-
दुदीची प्राच्येतस्मा तद्दिशि पशून्दधाति तस्मादुभये
देवमनुष्या पशूनुपजीवन्ति ॥ २२ ॥ ५ ॥

॥ इति तृतीयप्रपाठके पञ्चमं ब्राह्मणम् [४. ४] ॥

अथ मृत्पिण्डसाहित्येन पश्वभिमन्त्रणं विधत्ते— "इस्त एष भवतीति। 'एष' मृत्पिण्ड। "एतद्वा इत्यादेरय मर्थ — 'एतद्' इदानीं पिण्डसम्भरणकाले पश्वभिमन्त्रणेन एषु 'वीर्य' 'देवा' इव 'अय' यजमानोऽपि 'दधाति' निहितवान् भवतीति ॥ १ ॥

पूर्व मश्वाभिमन्त्रणं विधत्ते— "सोऽश्व मिति *। अश्वो ऽग्न्यात्मना स्तूयते— 'स' त्व 'रोदसी' द्यावापृथिव्यो 'गर्भ' इति जात असि', तथा 'ओषधीषु' ओषधिवनस्पत्यादिषु विषयेषु 'चारु' 'विभृत' विशेषेण सम्भृतोऽसि, 'चित्र' चित्रवर्ण, 'शिशु', 'अक्तून्' अक्तुशब्दो रात्रिवचन, तत्रत्यानि 'तमांसि' 'परि' योग्यक्रियाध्याहार, परीत्य, अतिरोचत इति। 'मातृभ्य'–इति चतुर्थी। ओषधयोऽत्र मातृशब्दवाच्या, तदर्थम्, तद्रक्षणार्थं 'कनिक्रदत्' अत्यर्थं क्रोशितशब्द कुर्वन् 'प्रगा' प्रगच्छसि †। "इणो गा लुङि"–इति गादेश ‡।

मन्त्र प्रतिपद मनूद्य व्याचष्टे— "इमे वै द्यावापृथिवी रोदसी इति ॥ २ ॥

* का० श्रौ० सू० १६ २ ८।

† वा० स० ११ ४३।

‡ पा० सू० २ ४. ४५।

रासभाभिमन्त्रणे मन्त्रं विधत्ते— "अथ रासभं स्थिरो भवेति *। हे 'भवन्' भगवन्! रासभ। 'स्थिर' निश्चलं 'भव'। 'वीड्वङ्ग' दृढाङ्ग, 'आशु' शीघ्रगति, 'वाजी' वेगवांश्च 'भव' इति। 'पृथु' स्थूलं भव। 'सुषद' शोभन-सदनवान् भव। 'अग्नेः पुरीषवाहन' गोमयस्य सैकतस्य वा वाहकत्वात् रासभस्य पुरीषवोढृत्वं प्रसिद्धम् ॥ ३ ॥

अजाभिमन्त्रणं विधत्ते— "अथाजं शिवो भवेति †। अङ्गिर-पदेन अग्निरुच्यते, तद्देवत्यत्वात्। हे 'अङ्गिर' अग्निरूप। अज। त्वं 'मानुषीभ्यः प्रजाभ्यः' 'शिवो भव'। 'द्यावापृथिवी' 'मा अभिशोचीः' मा हिंसीः। तथा 'अन्तरिक्षं', 'वनस्पतीन्'। सर्वत्र 'मा अभिशाचीः'-इति क्रियापदं सम्बद्धुमिति पदं प्रयुक्तम्। मन्त्रस्यार्द्धयोस्तात्पर्यं माह— "अङ्गिरा वा अग्निरित्यादिना ॥ ४ ॥

अश्वादिपशुत्रयाभिमन्त्रणगतसङ्ख्यां प्रशंसति— "त्रिभिरभि-मन्त्रयते इति। अग्नेस्त्रिवृत्त्वं पुरस्तादुक्तम् ॥ ५ ॥

अत्र सूत्रम्— "धारयत्येषा मुपरि पिण्डमनुपस्पृशन्निति ‡। 'एषां' त्रयाणां पशूनामुपरितनान् पशून् अनुपस्पृशन् पिण्डं धारयेदित्यर्थः। तदिदं विधत्ते— "अथैन मेतेषां पशूनामिति। उपस्पर्शनाभावं प्रशंसति— "वज्रो वै पशव इति। यतो वज्र-रूपाः पशवः, मृत्पिण्डश्च रेतोरूपः, अतो वज्रेण रेतः विच्छिन्नं न करोमीति बुद्ध्या न स्पृशे पशून्। अथवा 'अयं' मृत्पिण्डो

* वा० सं० ११ ४४।

† वा० सं० ११ ४५।

‡ का० श्रौ० सू० १६ ३ १०

हि 'अग्नि', अग्नि पशून् मा हिंसीदिति बुद्ध्या न स्पृशेत्।
'हिनसानि'-इति लोटि रूपम्, 'हिनसत्'-इति पञ्चमलकारे
रूपम् ॥ ६ ॥

अथाश्वस्योपरि धारण समन्त्रं विधत्ते—"त मश्वस्योपरिष्टा-
दिति *। 'वाजी' अन्नवान् अश्व 'प्रैतु' आगच्छतु। त
विशिनष्टि— 'कनिक्रदत्' अत्यर्थशब्द कुर्वन्, 'नानदत्' सर्वा
दिशो नादयन् 'रासभ' उपमाशब्दलोप गर्द्दभ इव 'पत्वा'
पतनशील। पते क्वनिपि रूपम्। 'पुरीष्य' पशुहितम्
'अग्निम्' धारयन्, 'आयुष' कर्मणोऽस्मात् 'पुरा' 'मा पादि'
मा विनश्यतु †। पदेश्चिणि रूपम्।

अश्वस्योपरि धारणमन्त्रे रासभ पत्वेति गर्द्दभवचनस्य
प्रयोजन माह— "तदश्वस्य यजुषि रासभ मिराहेति। अश्व-
मन्त्रे रासभवचने तस्माद्रासभ अश्वस्यातिशयितत्वोक्तौ तस्मिन्
गर्द्दभे शोकबलराहित्य मेव निहित भवतीति। 'आयुष'-इति-
पदस्यार्थ माह 'कर्मण' इति ॥ ७ ॥

अथोत्तरा ऋक्, सहितायामेव माम्नायते ‡—
"वृषाग्निं वृषण भरन्नपाङ्गर्भꣳ समुद्रियम्
अग्न आयाहि वीतये ऋतꣳ सत्य मृतꣳ सत्य
मग्निम्पुरीष्य मङ्गिरस्वद् भराम"-इति §।

* का० श्रौ० सू० १६ ३ १०।

† वा० स० ११ ४६ १।

‡ अस्मद्दृष्टसहितायास्तु "वृषाग्निम्"-इत्यादि "समुद्रियम्"-इत्य-
न्तश्च पाठ ४६ कण्डिकापरांशः।

§ वा० स० ११, ४७।

महाबृहतीयम्, "चत्वारोऽष्टका पादा आगतश्च महाबृहती" -इति। तस्य विभज्य विनियोगो विधीयते। तत्र तस्या' पूर्वार्द्धे तु रासभस्योपरि धारणम्, तृतीयपादेनाजस्योपरि धारणाय रासभ मृत्पिण्डहरणम्, चतुर्थेनाजस्योपरि धारणम्, पञ्चमेनानडापुरुषेक्षणम्। तदाह सूत्रकृत्— "प्रैतु वाजी तृषाग्नि मित्यश्वखरयो भग्न धायाहीत्याहृत्य खराच्छागन्यर्त्त सत्य मित्यानिधानात्, धायम्यावर्त्त पशूनज पुरस्ताद्रासभो मध्ये, स्वस्थानस्थितागा मेवाहृत्ति, अनडापुरुष मोक्षते पूर्ववदग्निं पुरीष्य मिति"-इति *। तदिद मव विधत्ते— "अथ रासभस्य तृषाग्नि तृषण मित्यादिना।

मन्त्रस्याय मर्थ †,— 'तृषण' वर्षक मृद्रूपम् 'अग्नि' 'भरन्' 'अपाङ्गभ' गर्भभूत, समुद्रे अन्तरिक्षे भव 'समुद्रिय' 'भरन्' 'अग्नि' मृद्रूप 'तृष' सिञ्च। तृषतेर्लोटि रूपम्। अर्द्धेन रासभ सम्बोध्य।

ब्राह्मणे, तृषेति कप्रत्ययान्त पद मिति व्याख्यातं— "तृषा वा अग्निरिति। तत्राय मर्थ,— 'तृषा' रेतस सेक्ता 'रासभ' 'तृषणम् अग्नि भरन्', तिष्ठतीति क्रियाध्याहार। तृतीयपादे अग्नि सम्बोध्य। हे 'अग्ने' मृद्रूप। 'वीतये' तर्पणाय 'आयाहि' रासभादागच्छ। 'ऋतम्' अग्नि, 'सत्यम्' आदित्य, यद्वा, 'ऋतम्' आदित्य, 'सत्यम्' अग्नि, उभयरूप मग्निम्, आहरिष्यामीति शेष। 'पुरीष्य' पशुहित मग्निम्, 'अङ्गिरस्वद्' अग्निवत् 'भराम' सम्भराम इति।

* का० श्रौ० सू० १६ २ ११, १२, १३।

† पाठस्त्वस्य वा० स० ११ ४६ ख, ४७ क।

मन्त्रगतानि पदानि व्याचष्टे— "वृषा वा अग्निरिति। "तदेनं रासभेनेति। मन्त्रस्य पूर्वार्द्धेन रासभस्योपरि मृत्पिण्डधारणेन तस्मिन् वृष सम्भृतवान् भवति ॥ ८ ॥

खरात् सकाशात् मृदाहरण समन्त्र विधत्ते— "अथा-पादत्त इति। "अग्न आयाहीति तृतीय पाद *। 'वीतये' -इत्यस्यार्थं माह— "अवितव इतीति। तर्पणार्थाद्व वेते † "मन्त्रे ह्वेष०"-इति ‡ क्तिन्, स चाद्दात्त। अपादान प्रश-सति— "तदेन ब्रह्मणेति। 'एन' मृत्पिण्ड 'ब्रह्मणा' ब्रह्म-रूपेण 'यजुषा' "अग्न आयाहि"-इति पादेन 'एतस्मात्' 'शौद्रात्' वर्णात् अपादत्तवान् भवति। रासभस्य वैश्यशूद्रजातिसम्बन्धो वक्ष्यते— "वैश्य च शूद्र चानु रासभ इति § ॥ ९ ॥

अजस्योपरि धारणमन्त्र विधत्ते— "अथाजस्यर्त्तं मिति। ऋत सत्य मिति द्विवार पठ्यते, तत्र प्रथमर्त्तसत्यपदयोरर्थं माह— "अय वा अग्निर्ऋत मिति। "यदि वेति, द्वितीयर्त्त-सत्यपदयोरर्थवचनम्। 'असौ' विप्रकृष्ट 'आदित्य' 'ऋतम्', 'अय मग्नि सत्यम्', उभयरूपोऽय मग्निर्मृद्रूप ॥ १० ॥

अग्निम्पुरीष्य मिति मन्त्रशेषस्य विनियोग उत्तरत्र वक्ष्यते ॥,

इदानी मश्वादीना मुपरि धारणे विनियुक्तमन्त्रगतसङ्ख्या त्रिवृ-दन्यात्मना स्तौति— "त्रिभिरिति। "प्रैतु वाजी"-इति

* ३३८ पृ० १८ प० द्रष्टव्यः।

† अदा० प० ३७ धा०।

‡ पा० सू० ३ ३ ९६।

§ इहैव वाद्यब्राह्मणे (३६२ पृ०) द्रष्टव्यम्।

‖ इहैवोपरिष्टात् चतुर्थब्राह्मणे (३६२) द्रष्टव्यम्

एको मन्त्र , "वृषाग्नि"—इति मन्त्रान्तरत्वा मपर , रासभाजयो-रुपरि धारणे विनियुक्तो द्वौ मन्त्रौ *। मन्त्रस्य लक्षण याज्ञिक-समाख्यान मिति , अत एकस्या ऋचि विभज्य विनियोगात् मन्त्रा बहव सम्पाद्यन्त इत्यविरोध †।

पूर्वं मन्त्राद्यभिमन्त्रणे विनियुक्तमन्त्रसङ्ख्याम् मिलित्वा प्रश-सति—"त्रिभि पुरस्तादिति। अभिमन्त्रणमन्त्रास्त्रय , धारण-मन्त्रास्त्रय , ते षट् सम्पद्यन्ते , तस्य स्तावक ब्राह्मण मति-दिशति—"तस्योक्तो बन्धुरिति। पिण्डपरिग्रहमन्त्रसङ्ख्याप्रस्तावे— "ता षट् सम्पद्यन्ते , षड् ऋतव"—इत्यादिना ‡ ॥ ११ ॥

अथैतेषा पशूना मावर्त्तन विधत्ते—"अथैनान् पशूनिति। स्वस्थानावस्थिताना मेवावर्त्तनम्। तत्रागन्तृणा पशूनां क्रम विधत्ते —"तेषा मज प्रथम इति §। पूर्वम् 'इत' मुदाहरणार्थं 'यता' गन्तृणां 'पशूना' मध्ये 'अश्व' प्रथमो गत , 'रासभ' मध्ये, पश्चात् 'अज', अधुना 'अज' प्रथम , 'रासभ' मध्ये, पश्चात् 'अश्व'। गमनागमनयोरुभयोरपि रासभस्य मध्येऽव-स्थानम् , अश्वाजयोरेव पौर्वापर्यम्। "अज वा अन्वश्व"—

---

* वा० स० ११ ४६ १, ४६ २, ३ ४७ १। अत्राह मही-धर — "का० धारयत्येषा मुपरि पिण्ड मनुपस्पृशन् प्रैतु वाजी इषाग्नि मित्यश्वखरयोरिति। अश्वादीना मुपरि पिण्ड धारयति तानस्पृशन् प्रैतु वाजीत्यश्वोपरि इषाग्नि मिति खरोपरीति सूत्रार्थ। महा-पङ्क्तिरष्टावसाना अष्टाचत्वारिंशदक्षरा महापङ्क्ति। आद्यावर्द्धर्चावश्व-देवत्यौ, तृतीयोऽर्द्धर्चोरासभदैवत्य , तृतीयचतुर्थपादौ बृहत्यौ"—इति।

† पुरस्तात् २३८ पृ० ४ पङ्क्तित २३६ पृ० १० पङ्क्तिपर्यन्तं द्रष्टव्यम्।

‡ पुरस्तात् ३ प्र० ३ ब्रा० १० का० (१९३ पृ०) द्रष्टव्या।

§ का० श्रौ० सू० १६ ३ १२।

इत्यादेरय मर्थ — अश्वादिपशुत्रयस्य क्षत्रियजातिसम्बन्ध, क्षत्रियस्य राज्ञ इतरेभ्यस्त्रिभ्यो वैश्यशूद्रब्राह्मणेभ्य पुरस्तात् गमन लोके दृष्ट मिति। तत्र यथा गमनसमये अश्वस्य प्राथम्यम्, तथा ब्राह्मणस्यानूचानस्य स्वव्यतिरिक्तवर्णत्रयात् प्रथमगमनं च दृश्यत इति अधुना अजस्य प्राथम्यम्, वैश्यशूद्रयो क्षत्रियाद् ब्राह्मणाद्वा पुरस्ताद् गमन नास्तीति मृदाहरणसमये पुनरागमनसमये च रासभस्य न प्राथम्यम्। तस्मात् कारणादेवम् — यान्ति अश्वपूर्वा प्रथमे, अधुनाजपूर्वा आगच्छन्ति 'अपापवस्यसाय' पापपरिहाराय। ब्राह्मणेन क्षत्रियेण च 'एतौ' वैश्यशूद्रौ 'अभित' मध्ये 'परिगृह्णीतौ', 'अनपक्रमिणौ' अनपक्रान्तौ 'कुरुते' ॥ १२, १३ ॥

विधत्ते — "अथानडापुरुष मिति *। तत्र पुरुष मिति पञ्चमम्। "अग्नि पुरीष्य मिति †। तदीक्षणेन तेनापि 'अनडापुरुषेण' पुरुषपशुप्रतिनिधिना मृद सम्भृतवान् भवति ॥ १४ ॥

विधत्ते — "त मजस्योपरिष्टादिति। अजस्योपरि मृत्पिण्ड धारयन्नेव 'एति' आगच्छेदध्वर्यु। तथाविध गमन मुभयथा प्रशसति — "आग्नेयो वा अज इति। 'अज' अग्निदेवत्य, मृदप्यग्नि, अतोऽजस्योपरि धारणात् स्वेन रूपेण स्वदेवत्य च सम्भृतवान् भवति। अपि अजो ब्राह्मणजातीय, ततो ब्राह्मणेनाप्येन कृत्पिण्ड सम्भृतवान् भवति ॥ १५ ॥

अथाजसकाशात् मृत्पिण्डस्यावरोहण समन्त्र विधत्ते ‡—

---

* का० औ० सू० १६ ३ १३।

† वा० सं० ११ ४७ ५।

‡ का० औ० सू० १६ ३ १४।

"अथैन मुपावहरतीति। हे 'ओषधय !' 'युष्मा' अत्र ग्रस सकारस्य "तस्माच्छसो न"–इति * नत्व सत्व विसर्जनीयः, युष्मानभिगच्छ 'आयन्तम्' आगच्छन्त 'शिवम्' 'एत' पुरोवर्त्ति-नम् 'अग्नि' 'प्रति मोदध्वम्' प्रतिमोदख भयराहित्यार्थम्।

उत्तरार्द्धे † मृदूपोऽग्नि सम्बोध्य। 'विश्वा' 'अनिरा' 'इरा' –इत्यन्ननाम ‡। अन्नप्रतिबन्धहेतून अनाहृष्ट्यादीन्, 'अमीवा' रोगाश्च 'व्यस्यन्' विक्षिपन्, हेतौ शतृप्रत्यय। रोगादिविक्षे-पाहेतो 'निषीदन्' उपविशन्, 'न' अस्माक 'दुमति' दुष्टु-तिमयी मतिम् 'अपजहि' अपनयेति।

प्रतिमोदध्व मिति यदोषधी प्रत्युक्तम्, तस्याभिप्राय माह— "एतद्वैतस्मादायत ओषधय इति। 'आयत' अग्ने सकाशात् 'ओषधयो बिभ्यति' स्वस्यात्मान भक्षयिष्यति किलेति। तत्परि-हाराय प्रतिमोदध्व मिति। यतोऽग्नि शान्त, ओषधयो यूय मेन प्रतिमोदध्वम्, 'शिव' सुखकर एव स्वरूप 'व' युष्मान् 'अभ्येति' अभिगच्छति, न वो हिंसिष्यतीति तात्प-र्यार्थ। उत्तरार्द्धगत दुमतिपद व्याचष्टे— "सर्व पाप्मान जहीति ॥ १६ ॥

द्वितीय मन्त्र विधत्ते— "ओषधय प्रतिगृह्णीतेति §। हे 'ओषधय'। 'एनम्' अग्निम् 'प्रतिगृह्णीत'। ता विशि-नष्टि— 'पुष्पवती' पुष्पवत्य, पुष्पसम्पन्ना, 'सुपिप्पलाः'

---

* पा० सू० ६ १ १०३।

† वा० स० ११ ४७ २ द्रष्टव्यम्।

‡ निघ० २ अ० ७ ख० १३ प०।

§ वा० स० ११ ४८।

शोभनफलवत्त्व , 'अयम्' अग्निर्वै युष्माकं मोषधीनां 'गर्भः'
'ऋत्विय ' ऋतुषु भव प्राप्तकाल 'प्रत्नं' पुरातनम् , 'सधस्थं'
सहस्थानम् 'आसदत्' आगमत् । सदेर्लुङि लृदित्त्वादङि रूपम् ॥

मन्त्रं व्याचष्टे— "एतद्वै तासां समृद्ध मिति । पुष्पफलवत्त्व मेव समृद्ध रूप मित्यर्थः ॥ १७ ॥

उपावहरणमन्त्रगतसङ्ख्या प्रशंसति— "द्वाभ्या मुपावहरति द्विपाद् यजमान इति । उक्तोऽर्थः * । पिण्डनिधानप्रदेशं कात्यायन सूत्रयामास— "उत्तरत आहवनीयस्योद्धतावोक्षिते सिकतोपकीर्णे परिश्रिते प्राग्द्वारे पिण्ड निदधात्योषधय इति"
–इति † । तदिदं विधत्ते— "त दक्षिणत उदञ्च मित्यादि , "तिर इवैव चिचरिषतीत्यन्तेन ‡ । 'त' पिण्ड 'दक्षिणत ' प्रदेशात् 'उदञ्चम्' आहरति उदङ्मुखम् 'उपावहरेत्' निदध्यात् । दक्षिणत उदगागमनस्य स्तावक ब्राह्मण मतिदिशति— "तस्योक्तो बन्धुरिति । पिण्डहरणसमये "त दक्षिणत उदञ्च माहरति दक्षिणतो वा उदग् योनौ रेत सिच्यत इति § ।

'यत्र' स्थाने 'एन' पिण्ड निदध्यात् , तत् स्थानम् 'उद्धतम्' उद्धननसंस्कृतम् , 'अवोक्षितम्' उदकसिक्त भवेत् । पिण्डस्याग्नित्वात् तत्स्थानप्रदेशकरण युक्त मित्याह— "उद्धते वा अवोक्षितेऽग्नि मिति । गार्हपत्यादिधिष्ण्यं इत्यर्थः । तस्मिन् प्रदेशे सिकताश्च विकीर्णा भवन्ति । तत्स्तावक ब्राह्मण मुत्तरत्र

* पुरस्तात् १८६ पृ॰ ३ पङ्क्तितो द्रष्टव्यम् ।
† का॰ श्रौ॰ सू॰ १६ ३ १४ ।
‡ पुरस्तात् (२३४ पृ॰ १४ पं॰—२३५ पृ॰ ७ पं॰) द्रष्टव्यम् ।
§ पुरस्तात् २१३ पृ॰ १५ पं॰ १०का॰ द्रष्टव्या ।

सप्तमकाण्डादौ गार्हपत्यचयनप्रस्तावे वच्यत इत्याह— "तासा मुपरि बन्धुरिति * ॥ १८ ॥

"परिश्रित भवतीति। तासा विकीर्णाना परिश्रित मिव परिवृत भवेत्। परिश्रित्करण नाम रक्षोभीत्या पुरस्य करण मित्यर्थ। प्रकारान्तरेण स्तौति— "अथो योनिर्वा इय मिति। इदं परिश्रितं स्थान योनिरूपम्, 'इद' पिण्डरूप 'रेत' इतश्च योनौ 'तिर' तिरोहितम् अप्रकाश 'सिच्यते'। उक्त मर्थं लोकप्रसिद्धया द्रढयति— "तस्मादिति। 'तस्मात्' खलु लोके 'स्वया जायया अपि' परिवृतस्थाने 'तिर इवैव' 'विच-रिषति' चरितु मिच्छति ॥ १९ ॥

"अथैनं विष्यतीति †। 'विष्यति' प्रमुञ्चेत्। पूर्वं कृष्णा-जिनपुष्करपर्णयोर्मध्ये पिण्ड निधाय, अन्तान् उद्गृह्य, योक्त्रेण बन्धन कृतम्, तद् योक्त्र मन्त्रोद्ग्रहणाच्च मुञ्चेदित्यर्थ। "तद्य-देवास्येति। पूर्वमन्त्रोपनद्धस्य बद्धस्य पिण्डस्य मोक्तो जात, 'तां' बन्धनजाता 'शुच' 'अस्मिन्' तद्विमोकेन निहितवान् भवति। किञ्च पुष्करपर्णं च योनिरूप मित्युक्तम् ‡, अतो बन्धनरूपयोक्त्रविमोकात् 'योनेरेव' पिण्ड मुखाद्यात्मना जायता मित्यभिप्रायेण तद्विमोक इत्यर्थ ॥ २० ॥

मन्त्र विधत्ते— "विपाजसा पृथुनेति §। पाज इति बल-नाम ‖। 'पृथुना' बलेन 'शोशुचान' दीप्यमानोऽग्निस्त्व

* उपरिष्टात (७ का० ५ प्र० १ ब्रा० ९, १० क०) द्रष्टव्ये।

† का० श्रौ० सू० १६ ३ १५ क।

‡ पुरस्तात २०३ पृ० ७ क० द्रष्टव्या।

§ वा० स० ११ ४९। ‖ निघ० २ अ० ९ ख० २ प०।

'द्विष' द्वेष्यान् 'रक्षस' राक्षसांश्च 'अमीवा.' रोगांश्च 'वि बाधस्व'। एवं प्रत्यक्षतो याचित्वा, इदानीं मन्त्रिं परोक्षीकृत्य स्वयं माशिष्यमाणं ते 'सुशर्मण' साधुशरणस्य, 'सुहुत', 'सुहवस्य' शोभनाह्वानस्य 'अग्ने' 'प्रणीतौ' प्रकृष्टनीतौ 'शर्मणि' शरणे अहं 'स्याम्' भवेयं मित्यर्थः। मन्त्रस्यार्द्धयोस्तात्पर्यं माह— "बाधस्व सर्वान् पाप्मन इति, "आशिष माशास्ते इति च ॥ २१ ॥

अत्र सूत्रम्— "अजलोमान्यादाय प्रागुदीच पशूनुत्सृजतीति *। तद् विधत्ते— "अथाजलोमानीति। 'उदीच प्राच' ईशानदिगभिमुखान् 'प्रसृजति' विसृजेत्। तां दिशं प्रशंसति— "एषा ह्युभयेषा मिति। गतं मन्यत् ॥ २२ ॥ ५ [४ ४] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
षष्ठकाण्डे चतुर्थाध्याये चतुर्थं ब्राह्मणम् ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद् विद्यातीर्थमहेश्वरः ॥ ४ ॥

ब्रह्माण्डं गोसहस्रं कनकहयतुलापूरुषौ स्वर्णगर्भम्,
सप्ताब्धीन् पञ्चसीरीन्विदशतकलताधेनुसौवर्णभूमी।
रत्नोस्रा कक्षवाजिद्विपसहितरथौ सायणः सिन्धुपार्यं,
व्यश्राणीद्विश्वचक्रं प्रथितविधिमहाभूतयुक्तं घटञ्च ॥

* का० श्रौ० सू० १६ ३ ३५

धान्याद्रि धन्यजन्मा तिलभव मतुल स्वर्णज वर्णमुख्य ,
कार्पासीय कृपावान गुडकृत मजडो राजत राजपूज्य ।
षाज्योत्थ प्राज्यजन्मा लवणज मनृण शार्कर चार्कतेजा ,
रत्नाढ्यो रत्नरूप गिरि मकृत मुदा पात्रसात्क्षिङ्गणार्य * ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तक-
श्रीहरिहरमहाराजसाम्राज्यधुरन्धरेण
सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
षष्ठकाण्डे चतुर्थोऽध्याय समाप्त ॥ ४ ॥

* अथत्यादीष्यम्य, पञ्चमकाण्डीयद्वितीयाध्यायान्ते द्रष्टव्याः ।

(अथ पञ्चमाध्यायस्य प्रथमं ब्राह्मणम्)

पर्णकषायनिष्पक्वा एता आपो भवन्ति। स्थेम्ने न्वेव यद्वेव पर्णकषायेण सोमो वै पर्णश्चन्द्रमा उ वै सोम एतदु वा ऽएक मग्निरूप मेतस्यैवाग्नि-रूपस्योपाप्त्यै ॥ १ ॥

ता उप सृजति। आपो हि ष्ठा मयोभुव इति यां वै देवता मृगभ्यनूक्ता या यजु सैव देवता सऽर्क् सो देवता तद्यजुस्ता हैता आप एवैष त्रिचस्तद्या अमूराप एकꣳ रूपꣳ समसृज्यन्त ता एतास्तदेवैतद्रूपं करोति * ॥ २ ॥

अथ फेनं जनयित्वान्ववदधाति। यद्वेव तत् फेनो द्वितीयꣳ रूप मसृज्यत तदेवैतद्रूपं करोत्यथ या मेव तत्र मृदꣳ संयौति सैव मृद् यत्तत् तृतीयꣳ रूप मसृज्यतैतेभ्यो वा ऽएष रूपेभ्यो ऽग्रेऽसृज्यत तेभ्य एवैन मेतज्जनयति ॥ ३ ॥

* 'करोति'—इति क ख ।

अथाजलोमैः सꣳसृजति । स्थेम्ने न्वेव यद्वे-
वाजलोमैरेतद्वा ऽएनं देवा पशुभ्योऽधि समभरं-
स्तथैवेन मय मेतत् पशुभ्योऽधि सम्भरति तद्यद-
जलोमैरेवाजे हि सर्व्वेषां पशूनाꣳ रूप मथ यल्लोम
लोम हि रूपम् ॥ ४ ॥

मित्र· सꣳसृज्य । पृथिवीं भूमिञ्च ज्योतिषा
सहेति प्राणो वै मित्र प्राणो वा ऽएतदग्रे कर्मा-
करोत् सुजात जातवेदस मयक्ष्माय त्वा सꣳसृजामि
प्रजाभ्य इति यथैव यजुस्तथा बन्धु· ॥ ५ ॥

अथैतत्त्रय पिष्टं भवति । शर्कराश्मायोरस-
स्तेन सꣳसृजति स्थेम्ने न्वेव यद्वेव तेनैतावती
वा ऽइय मग्रे ऽसृज्यत तद्यावतीय मग्रे ऽसृज्यत
तावती मेवैना मेतत् करोति * ॥ ६ ॥

रुद्राः सꣳसृज्य । पृथिवीं बृहज्ज्योतिः समी-
धिर ऽइत्यसौ वा ऽआदित्य एषो ऽग्निरेतद्वै तद्रुद्रा
सꣳसृज्य पृथिवीं बृहज्ज्योतिः समीधिरे तेषां

* 'करोति'—इति क, ख ।

भानुरजस्र इच्छुक्रो देवेषु रोचत ऽइत्येष वा ऽएषा भानुरजस्रं शुक्रो देवेषु रोचते ॥ ७ ॥

द्वाभ्याᳪं सᳪंसृजति । द्विपाद्यजमानो यजमानो ऽग्निर्यावानग्निर्यावत्यस्य मात्रा तावतैवैनमेतत् सᳪंसृजति ॥ ८ ॥

अथ प्रयौति । सᳪंसृष्टां वसुभी रुद्रैरिति सᳪंसृष्टा ह्येषा वसुभिश्च रुद्रैश्च भवति यन्मित्रेण तद्वसुभिर्यद्रुद्रैस्तद्रुद्रैर्धीरैः कर्मण्यां मृदमिति धीरा हि ते कर्मण्यो ऽइयं मृद्धस्ताभ्यां मृद्वीं कृत्वा सिनीवाली कृणोतु तामिति वाग्वै सिनीवाली सैनाᳪं हस्ताभ्यां मृद्वीं कृत्वा करोत्वित्येतत् * ॥ ९ ॥

सिनीवाली सुकपर्दा सुकुरीरा स्वौपशेति । योषा वै सिनीवाल्येतद्वै योषायै समृद्धᳪं रूपं यत् सुकपर्दा सुकुरीरा स्वौपशा समर्धयत्येवैनामेतत् सा तुभ्यमदिते मह्योखां दधातु हस्तयोरिति वाग्वा ऽअदितिर्मह्यस्यै तदाह ॥ १० ॥

* 'करोत्वित्येनत'—इति ग, घ ।

उखां कृणोतु । शक्त्या बाहुभ्या मदितिर्धि-
येति शक्त्या च हि करोति बाहुभ्यां च धिया च
माता पुत्र यथोपस्थे साग्नि बिभर्त्तु गर्भ ऽआति
यथा माता पुत्र मुपस्थे बिभृयादेव मग्निं गर्भे
बिभर्त्विंत्येतत् * ॥ ११ ॥

त्रिभि प्रयौति । त्रिवृदग्निर्यावानग्निर्यावत्यस्य
मात्रा तावतैवैन मेतत् प्रयौति द्वाभ्याᳫं सᳫं-
सृजति तत् पञ्च पञ्चचितिको ऽग्नि पञ्च ऽर्त्तव
सम्वत्सर' सम्वत्सरोऽग्निर्यावानग्निर्यावत्यस्य मात्रा
तावत्तद् भवति त्रिभिरप उपसृजति तदष्टावष्टा-
क्षरा गायत्री गायत्रोऽग्निर्यावानग्निर्यावत्यस्य
मात्रा तावत् तद् भवत्यथो ऽअष्टाक्षरा वा ऽइय
मग्रेऽसृज्यत तद्यावतीय मग्रेऽसृज्यत तावती मेवैना
मेतत् करोति ॥ १२ ॥ ६ ॥

॥ इति तृतीयप्रपाठके षष्ठं ब्राह्मणम् [५. १.] ॥

* 'बिभर्त्विंत्येतत'—इति घ, ङ

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे, तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥

अत्र कात्यायनः — "आपो हि ष्ठेति पर्णकषायपक्वमुदकमासिञ्चति पिण्डे"–इति *। पलाशपर्णक्वथितमुदकं मृत्पिण्डे सिञ्चेत्। तत्र जलानां पर्णक्वथितत्वं विधत्ते— "पर्णकषायनिष्पक्वा एता इति। 'एता' मृत्पिण्डे सिच्यमाना आपः 'पर्णकषायनिष्पक्वा' पलाशपर्णक्वथिता भवेयुः। 'स्थेम्ने' स्थिरत्वायैव, केवलमृदोखादिकरणे विशरणं स्यात्। पर्णकषायेण पाकं प्रशंसति— "यद्वेव पर्णेति। सोमस्य पर्णत्वम्, सर्वौषध्यनुप्रवेशात्। सोमो नाम चन्द्रमा। स हि 'एकम् अग्निरूपम्'। पूर्वं कुमारस्याग्नेरष्टौ रुद्रादिनामान्युक्तानि †, तेषाञ्चाम्न्युदकौषध्यादीनि रूपाण्यप्युक्तानि ‡। तत्र महादेवेति सप्तमनाम्न चन्द्रमा रूपम्, चन्द्रमास्तद्रूपमभवदित्युक्तम् §। तादृशस्याग्निरूपस्योपाप्त्यै पर्णकषायपक्वां कुर्यादित्यर्थः ॥ १ ॥

उपसेचनमन्त्रं विधत्ते— "ता उपसृजत्यापो हि ष्ठेति ‖। अब्देवत्य तृचं गायत्रम्। तृचस्यायमर्थः — हे 'आपः' आप्यते सर्वं कार्यं प्राणिना याभिरित्यापः। आप्नोते करणे कर्त्तरि वा क्विप्, तत्सम्बोधनम्। 'मयोभुवः' मय इति सुखनाम, सुखस्य

* का० श्रौ० सू० १६ ३ १६ ।
†, ‡ १ प्र० ३ ब्रा० १० कण्डिका. (४१ पृ०) द्रष्टव्यानि ।
§ ४२ पृ० १३ पं० द्रष्टव्यम् ।
‖ वा० सं० ११ ५० ।

भावयित्वा । 'स्था'। 'हि' यस्मात् ता एवम्भूता यूयं 'न' अस्मान् 'ऊर्जे' अन्नाद्याय 'दधातन' स्थापयत। "तप्तनप्तनथनाश्च"–इति * तस्य तनबादेश । 'महे' महते 'रणाय' रमणीयाय 'चक्षसे' दर्शनाय, ज्ञानाय धत्तेति ॥　　॥ "यो व इति। 'व' युष्माकं 'य' 'शिवतम' अतिशयेन सुखकर 'रस', 'तस्य' रसस्य 'न' अस्मान् 'इह' लोके 'भाजयत' भागिन कुरुत। 'उशती' कामयमाना 'मातर इव' यथा मातर पुत्रस्य हित कामयन्ते, एव यूय मिति ॥　　॥ "तस्मा अर मिति। 'व' युष्मत्सम्बन्धिने 'तस्मै' रसाय 'अर' शीघ्रम्, 'अल' पर्याप्तं वा 'गमाम' गच्छेम। "क्रियार्थोपपदस्य"–इति † चतुर्थी। 'यस्य' रसस्य 'क्षयाय' अस्मासु निवासार्थं हि स्वय 'जिन्वथ' प्रीणयथ। "जिवि प्रीणनकर्मा ‡। येन रसेन अस्मान् तर्पयथ, त गच्छेम। हे 'आप' 'न' अस्मान् 'जनयथ' युष्मदीयभोक्तृत्वेनोत्पादयतेति ऋचस्य सङ्गृहीतोऽर्थं ॥

तिस्र ऋच, तत्प्रतिपाद्या मन्त्रदेवताश्च प्रशसति— "या वै देवता मिति। "आपो हि ष्ठेत्यादिका 'ऋक्' 'या देवताम्' 'अभ्यनुक्ता' अनुवदति, कर्त्तरि क्त प्रत्यय । 'यां' देवता 'यजु'-मन्त्रोऽपि। यया ऋचा, येन यजुषा च, या देवता अभ्युगुणाभिधानपुरस्सरं प्रतिपाद्यते, सैव प्रतिपाद्या देवता, सा च प्रतिपादिका ऋक्, यजुर्मन्त्रपदैरप्रतीयमाना देवता नोक्तमित्यर्थ.। अत प्रतिपाद्यप्रतिपादकयोरभेदोपचारेण 'एता'

---

* पा० सू० ७ १ ४५।

† पा० सू० २ ३ १४।

‡ धा० प० ५६४ धा०।

आप 'एव' देवता , 'एष ' "आपो हि ष्ठा "-इति 'त्रिच '। 'तत्' तस्माद् 'या ' 'अमू ' अद शब्दो विप्रकृष्टप्रदेशवचन । पूर्व काण्डादौ अग्निसृष्टेरनन्तरम् अश्वादि पृथिव्यन्त सृष्टि मुक्ता *, "सोऽकामयताभ्योऽद्भ्योऽधि प्रजनयेय मित्युपक्रम्य †, "तदिद मेक मेव रूप" कृतवान् भवति । एव मनुसन्धानार्थ मुदकफेनमृत्सिकताशर्कराश्मादिसृष्टिरुक्तेति चयनादौ प्रतिपादितम् ‡ ॥ २ ॥

पिण्डे फेनासेचन विधत्ते— "अथ फेन जनयित्वेति § । कषायोदकेषु हस्तचालनेन फेन मुत्पाद्य पिण्डे तूष्णी मासिञ्चेत । "यदेव तत्फेन इत्यादेरय मर्थ । पूर्व "सोऽकामयताभ्योऽद्भ्यो ऽधीमा प्रजनयेयम्"-इत्युपक्रम्य , "तदिद मेक मेव रूप समदृश्यताप एव"-इति ‖ , उदकलक्षण रूप मुक्त्वा , "सोऽकामयत भूय एव स्यादिति तेपान फेन मसृजत"-इति ¶ द्वितीय फेनात्मक रूप सृष्ट्यात्मकम् । अत्र फेनस्य पिण्डे आसेचनेन पूर्वसृष्टफेनात्मक द्वितीय रूप मेव मृद्रूपेऽग्नौ निहितवान् भवति ।

अथ सिक्तेऽग्नौ उदकेन मृद सम्मिश्रण विधत्ते— "अथ या मेव तत्र मृद मिति । तत्र 'या मृद' 'मयीति' जलेन सम्मिश्रयति 'सा मृत्' । एतदन्तर सृष्ट मृदात्मक तृतीय रूपम् । तत्र ह्येव माम्नातम्— "अथ यो गर्भोऽन्तरासीत् सोऽग्निरसृज्य-

* १ प्र० १ ब्रा ११ कण्डीस (४ पृ०) द्रष्टव्यम् ।
†, ‡ ५ पृ० ८ पङ्क्तितो द्रष्टव्यम् ।
§ का० श्रौ० सू० १६ ३ १७ ।
‖, ¶ ५ पृ० ८ पङ्क्तितो द्रष्टव्यम् ।

तीति * । "स आपस्तेपानो मृदᳪ शुष्काप मिति †, तेभ्यो वा एष"–इति । 'एष' अग्नि 'तेभ्य' उदकफेनमृदादिभ्य पूर्वं सृष्ट । अतो जलफेनमृदा सम्मिश्रणेन अबादिरूपेभ्य पूर्वं सृष्टाग्नि मेव उत्पादितवान् भवति ॥ ३ ॥

अथ तत्राजलोममिश्रण विधत्ते— "अथाजलोमै ससृज-तीति ‡ । 'स्थेम्ने' स्थिरत्वाय । अजलोम प्रशसति— "यद्दे-वाजलोमैरिति । यथा पूव 'देवा' 'एनम्' अष्टरूपात्मना गूढ मग्नि पुरुषादिपञ्चपशुभ्य सकाशात् सम्भृतवन्त, तथा 'अय' यष्टा पिण्डेऽजलोमससर्गेण सर्वेभ्य पुरुषादिभ्य अग्ने सम्पादन मित्याशङ्क्य अजपशौ सव पशुरूप मुपपादयति— "अजे ह्रि सर्वेषा मिति । तथा पुरस्तात् वायव्यैकपशुप्रस्तावे समाम्ना-तम्— "यद्देवैत पशु मालभत एतस्मिन् ह पशौ सर्वेषा पशू नाᳪ रूपम्, यत् तूपरो लमुदी तत् पुरुषस्य रूपम्"–इत्या-दिना § प्रकारेण अजे सर्वपशुरूप माह— "अथ यल्लोमेति । लोमानि सर्वेषु पशुषु सन्ति, लोमलक्षण रूप सर्वसाधारण मित्यर्थं ॥ ४ ॥

लोमसम्मिश्रण विधत्ते— "मित्र ससृज्येति ‖ । 'मित्र' प्राण, आदित्यो वा । 'पृथिवी भूमि च' लोकत्रयस्यापि पृथिवी-शब्दवाच्यत्वम्, भूमिशब्दवाच्यत्व च दृश्यते— "तिस्रो भूमी-

* ४ पृ० १४ पङ्क्तितो द्रष्टव्यम् ।

† ६ पृ० २ पङ्क्तितो द्रष्टव्यम् ।

‡ का० औ० सू १६ ३ १८ ।

§ २ प्र० १ ब्रा० १५ क० (६० पृ० ११ प०) द्रष्टव्यम् ।

‖ वा० स० ११ ५३ ।

धारयन् त्रीणि त भून्"–इति *। 'तिस्रः भूमी' तिस्रः पृथिवीः अत्रैतयोरुभयोर्दर्शनात् चकारशब्देनापि त्रीन् लोकानित्यर्थं सिद्ध । 'ज्योतिषा' तेजसा । अत्र ज्योति शब्दोऽजलोमवचन । अजस्याग्नेयत्वादजलोमभिः. 'सह' 'सुजात जातवेदसम्' सद्रूप मग्निं त्वाम् 'प्रजाभ्य' 'अयक्ष्माय त्वा' रोगरूपपापापमुक्तये 'संसृजामि' सम्मिश्र करोमि, अह मध्वर्युरिति ॥ ५ ॥

अथ शर्कराश्मायोरसचूर्णैं ससर्गं विधत्ते— "अथैतत् त्रय पिष्ट मिति †। 'एतद्' वक्ष्यमाण शर्करादित्रय चूर्णित भवेत् । "पिष्लृ सञ्चूर्णने"–इत्यस्य ‡ निष्ठा। पूर्व शर्करादीनि त्रीणि रूपाणि सृष्टानि, "शर्करा मश्मान मयो हिरण्य मोषधिवनस्पत्य-सृजत"–इति हि प्रागाम्नातम् §, अधुना तेन त्रयेण ससर्गं तैरेव त्रिभीरूपैर्मृदं रूपवतीं जातवान् भवति ॥ ६ ॥

मन्त्रं विधत्ते— "रुद्रा स्स्ॢज्येति ‖। 'रुद्रा' 'पृथिवीं' पार्थिव 'बृहज्ज्योति' अग्निलक्षण पार्थिव पिण्ड 'शर्करा-श्मयो', ते 'संसृज्य' 'समीधिरे' उखाया दीपितवन्त । रुद्रा उखाया मग्नि सवत्सर धारितवन्त । तेषा फल माह— "तेषा मिति। 'तेषा' रुद्राणाम् 'भानु' दीप्ति 'अजस्र इत्' अनु-पक्षीणैव 'देवेषु' मध्ये 'शुक्र' शुक्लवर्णो 'रोचते' दीप्यते ॥ ७ ॥

---

* ऋ० स० २ २७ ८ ऋक्प्रथमचरण मिदम् ।

† का० श्रौ० सू० १६ ३ १९ । ‡ रु० प० १४ धा० ।

§ १ प्र० १ ब्रा० १३ क० (६ पृ० ३ पं०) । "शर्करा सूक्ष्मकण्ड का, अयोरसो लोहरसो यस्माप्यमागात् लोहात् एघम भवति लोहं इति लोके प्रसिद्ध', अश्मा छाट, पाषाण "–इति कर्काचार्य: ।

‖ वा० स० ११ ५४ ।

"द्वाभ्या सꣳसृजतीति। पूर्वं मजलोमै संसर्गे एको मन्त्र, शर्करादिसंसर्गे द्वितीय, तावुभौ मिलित्वा प्रशंसति— "द्विपाद्यजमान इति ॥ ८ ॥

अथ मृद सम्मिश्रण समन्त्र विधत्ते— "अथ प्रयौतीति *। तिसृभिर्ऋग्भि † मृद प्रकर्षेण 'यौति' पिण्डे सम्मिश्रयेत्। 'धीरै' कर्मणीभि मृद्भि, 'वसुभि' 'रुद्रै' च 'मरुद्भ्याम्'। वसुपदेनात्राजलोमसंसर्गमन्त्रो "मित्र संसृज्य"-इति विवक्षित। रुद्रपदेन शर्करादिसंसर्गमन्त्रो "रुद्रा संसृज्य"-इति विवक्षित। तन्मन्त्रद्वयप्रतिपाद्यै वसुभि रुद्रैश्च संयोजिताभ्यां कर्मभ्या सम्पादिता 'मृद' मृत्तिका 'सिनीवाली' दृष्टेन्दु, तदभिमानिदेवता 'हस्ताभ्या' 'मृद्वी' मृदुरूपा 'कृत्वा', 'ता' कर्मार्थां 'कृणोतु' करोतु।

वसुरुद्रपदाभ्यां "मित्र संसृज्य", "रुद्रा संसृज्य"-इति मन्त्रौ विवक्षितावित्याह— "यन्मित्रेण तद्‌ वसुभिर्यद्रुद्रैरिति ॥ ९ ॥

"सिनीवालीति ‡। एष द्वितीयो मन्त्र। तस्याय मर्थ,— सिनीवाल्या योषात्वात् तदुचिता धर्मा उच्यन्ते— "सुकपर्देत्यादि। 'सुकपर्दा' कपर्द केशसंयमनवेणि, साधुवेणियुक्ता। 'सुकुरीरा' कुरीरो मुकुट, तद्वती। "स्वौपशा' औपशो नाम जघनभाग, सुजघना। यद्वा, उपशेते शयन करोति यैरवयवविशेषै ते सर्वेऽप्युपशा, तेषा समूह औपश, स्वौप

* का० श्रौ० सू० १६ ३ २०।

† वा० स० ११ ५५, ५६, ५७।

‡ वा० सं० ११ ५६।

शवती *। या एवंविधा सिनीवाली, सा। हे 'अदिते', हे 'महि' महीरूपे। 'तुभ्य' 'हस्तयो' 'उखां' 'दधातु' स्थापयतु। "योषा वै सिनीवाली"—इत्यादिना योषात्वसमर्थनम् ॥ १० ॥

"उखां कृणोत्विति †। अथ तृतीयो मन्त्र। तस्याय मर्थ,— 'अदिति' अखण्डनीया, एतन्नामधेया देवता 'बाहुभ्यां' 'शक्त्या' सामर्थ्येन 'धिया' बुद्ध्या च 'उखां' 'कृणोतु' करोतु। 'यथा माता, पुत्र' 'उपस्थे' स्वोत्सङ्गे 'बिभर्त्ति', एवं सा अदिति 'गर्भे' उखाभ्यन्तरे 'अग्निम्' 'आबिभर्त्तु' सर्वतो धारयतु 'इति' ॥ ११ ॥

सन्निग्रपणमन्त्रगतत्रित्वसङ्ख्या त्रिवृदन्यात्मना स्तौति— "त्रिभि प्रयौति त्रिवृदिति। पूर्वं मजलोमशर्करादिससर्गे मन्त्रौ द्वौ, ताभ्यां सहोक्तसङ्ख्या प्रशसति— "द्वाभ्यां ससृजति, तत् पञ्च पञ्चचितिकोऽग्निरिति। "पञ्चर्त्तव इति। "हेमन्तशिशिरयो समासेन"—इत्युक्तम् ‡। अग्ने संवत्सरात्मकत्वात्, अग्नेश्च पञ्च-सङ्ख्यया तद्रूपा मृद सम्पादितवान् भवति, अथोदकसेचने "आपो हि ष्ठेत्याद्यास्तिस्र, ताभि सहैता पञ्चसङ्ख्या प्रशसति— "त्रिभिरप उपसृजति तदष्टाविति। अग्नेर्गायत्रत्व सङ्ख्यासामान्यात्। तथाचान्यत्राम्नातम्— "यद्देवाष्टावग्निरूपाणि अष्टाक्षरा गायत्री, तस्मादाहुर्गायत्रोऽग्निरिति"—इति §।

---

* अपुंस्त्व' पद मिद स्यात सायणस्य, "न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत तदर्थप्रतिपत्तिकर'—इति वैयाकरणसिद्धान्तात्।

† वा० स० ११ ५७।

‡ ऐ० ब्रा० १.१ १।

§ १ प्र० ३ ब्रा० ६ क० (४१ पृ०) द्रष्टव्यम्।

प्रकारान्तरेणाष्टसङ्ख्या प्रशंसति—"अथो अष्टाक्षरेति। पूर्वं प्रथमाध्याये तृतीयब्राह्मणे प्रजापतिरेक एव सन् अस्यां पृथिव्यां बहुधा प्रजायेयेति विचार्य उदकफेनमृत्सिकताशर्कराश्मायो-हिरण्याष्टौ सृष्टाक्षरत्— "तद् यदसृज्यताक्षरत् तद्यदक्षरत् तस्मादक्षरम्, अष्टौ कृत्वोऽक्षरत् सैवाष्टाक्षरा गायत्र्यभवत्"-इति *। यथा 'यावती' अष्टाक्षरा 'अग्रे' पूर्वम् 'असृजत', तथा अग्नि "आपो हि ष्ठा"-इत्यादिभिर्मन्त्रैर्मृत्पिण्डे उदकसेचनाज-लोमशर्करादित्रयसंसर्गमिश्रणे 'तावतीम्' तत्सङ्ख्याम् 'एना' मृदं कृतवान् भवतीति ॥ १२ ॥ ६ [५ १] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
षष्ठकाण्डे पञ्चमाध्याये प्रथमं ब्राह्मणम् ॥

(अथ द्वितीयं ब्राह्मणम्)

अथ मृत्पिण्डमुपादत्ते। यावन्तं निधयेऽलं मन्यते मखस्य शिरोऽसीति यज्ञो वै मखस्तस्यै-तच्छिर आहवनीयो वै यज्ञस्य शिर आहवनीय-मु वा ऽएतं चेष्यन् भवति तस्मादाह मखस्य शिरो-ऽसीति ॥ १ ॥

---

* १ प्र० ३ ब्रा० ६का० (४० पृ० ८ पं०) द्रष्टव्यम्।

यद्देवाह मखस्य शिरो ऽसीति। जायत ऽएष एतद्यज्ञीयते शीर्षतो वै मुखतो जायमानो जायते शीर्षतो मुखतो जायमानो जायाता ऽइति ॥ २ ॥

त प्रथयति। व्वसवस्त्वा कृण्वन्तु गायत्रेण छन्दसाङ्गिरस्वदित्ययꣳ ह्येष लोको निधिस्त मेतद्-सवो गायत्रेण छन्दसाकुर्व्वंस्तथैवैन मय मेतद् गायत्रेण छन्दसा करोत्यङ्गिरस्वदिति प्राणो वा ऽअङ्गिरा ध्रुवासीति स्थिरासीत्येतदथो प्रतिष्ठिता-सीति पृथिव्यसीति पृथिवी ह्येष निधिर्धारया मयि प्रजाꣳ रायस्पोषं गौपत्यꣳ सुवीर्यꣳ सजातान्यज-मानायेत्येतद्वै व्वसव इमं लोक कृत्वा तस्मिन्नेता माशिष माशासत तथैवैतद्यजमान इम लोक कृत्वा तस्मिन्नेता माशिष माशास्ते ता प्रादेशमात्रीं कृत्वाथास्यै सर्व्वतस्तीर मुन्नयति ॥ ३ ॥

अथ पूर्व्व मुद्धि मादधाति। रुद्रास्त्वा कृण्वन्तु त्रैष्टुभेन छन्दसाङ्गिरस्वदित्यन्तरिक्षꣳ ह्येष उद्धिस्त मेतद् रुद्रास्त्रैष्टुभेन छन्दसा कुर्व्वंस्तथैवैन मय मेतत् त्रैष्टुभेन छन्दसा करोत्यङ्गिरस्वदिति प्राणो वा ऽअङ्गिरा ध्रुवासीति स्थिरासीत्येतदथो प्रतिष्ठिता-

सीत्यन्तरिक्ष मसीत्यन्तरिक्षᳪ ह्येष उखिर्धारया मयि प्रजाᳪ रायस्पोष गौपत्यᳪ सुवीर्यᳪ सजातान्यज-मानायेत्येतद्वै रुद्रा अन्तरिक्ष कृत्वा तस्मिन्नेता माशिष माशासत तथैवैतद्यजमानो ऽन्तरिक्ष कृत्वा तस्मिन्नेता माशिष माशास्ते ताᳪ सलिप्य सᳪ-स्नज्या * ॥ ४ ॥

अथोत्तर मुखि मादधाति । आदित्यास्त्वा कृ-ण्वन्तु जागतेन छन्दसाङ्गिरस्वदिति द्यौर्ह्येष उखिस्त मेतदादित्या जागतेन छन्दसाकुर्व्वंस्तथैवैन मय मेतज्जागतेन छन्दसा करोत्यङ्गिरस्वदिति प्राणो वा ऽअङ्गिरा ध्रुवासीति स्थिरासीत्येतदथो प्रति-ष्ठितासीति द्यौरसीति द्यौर्ह्येष उखिर्धारया मयि प्रजाᳪ रायस्पोष गौपत्यᳪ सुवीर्यᳪ सजातान्यज-मानायेत्येतद्वा ऽआदित्या दिव कृत्वा तस्या मेता माशिष माशासत तथैवैतद्यजमानो दिव कृत्वा तस्या मेता माशिष माशास्ते ॥ ५ ॥

अथैतेन चतुर्थेन यजुषा करोति । विश्वे

---

* 'सᳪस्नज्या — इति क', ग ।

त्वा देवा वैश्वानरा॑ ऋवन्त्वानुष्टुभेन छन्दसाङ्गिरस्वदिति दिशो हैतद्यजुरेतद्वै विश्वे देवा वैश्वानरा एषु लोकेषूखाया मेतेन चतुर्थेन यजुषा दिशोऽदधुस्तथैवैतद्यजमान एषु लोकेषूखाया मेतेन चतुर्थेन यजुषा दिशो दधात्यङ्गिरस्वदिति प्राणो वाऽअङ्गिरा ध्रुवासीति स्थिरासीत्येतदथो प्रतिष्ठितासीति दिशोऽसीति दिशो ह्येतद्यजुर्धारया मयि प्रजाꣳ रायस्पोष गौपत्यꣳ सुवीर्यꣳ सजातान्यजमानायेत्येतद्वै विश्वे देवा वैश्वानरा दिश॑ कृत्वा तास्वेता माशिष माशासत तथैवैतद्यजमानो दिश. कृत्वा तास्वेता माशिष माशास्ते ॥ ६ ॥

तेनैतेनान्तरतश्च बाह्यतश्च करोति। तस्मादेषां लोकाना मन्तरतश्च बाह्यतश्च दिशाऽ परिमित मेतेन करोत्यपरिमिता हि दिश॑ ॥ ७ ॥

ता प्रादेशमात्री मेवोर्ध्वां करोति। प्रादेशमात्रीं तिरश्चीं प्रादेशमात्रो वै गर्भो विष्णुर्योनिरेषा गर्भसम्मितां तद्योनिं करोति ॥ ८ ॥

सा यदि व्वर्षीयसी प्रादेशात्स्यात् । एतेन यजुषा ह्रसीयसीं कुर्याद्यदि ह्रसीयस्येतेन व्वर्षीयसीम् ॥ ९ ॥

स यद्येकः पशुः स्यात् *। एकप्रादेशां कुर्यादथ यदि पञ्च पशवः स्युः पञ्चप्रादेशा कुर्यादिषुमात्रीं वा व्वीर्यं वाऽइषुर्व्वीर्यसम्मितैव तद्भवति पञ्चप्रादेशा ह स्म त्वेव पुरेषुर्भवति ॥ १० ॥

अथ तिरश्चीᳬ रास्नां पर्यस्यति । दिशो हैव सैतद्वै देवा इमाल्लोकानुखां † कृत्वा दिग्भिरदृᳬहन् दिग्भिः पर्यतन्वस्तथैवैतद्यजमान इमाल्लोकानुखां ‡ कृत्वा दिग्भिर्दृᳬहति दिग्भिः परितनोति ॥ ११ ॥

ता मुत्तरे व्विलतीये पर्यस्यति । अत्र हैषां लोकाना मन्ताः समायन्ति तदेवैनास्तद् दृᳬहति § ॥ १२ ॥

---

* 'स्यात'—इति ग, घ ।

† इमाᳬल्लोका०'—इति ग, घ ।

‡ 'इमाᳬल्लोका०'—इति ग, घ ।

§ 'दृᳬहति'—इति ख ।

आदित्यै रास्नासीति । वरुण्या वै यज्ञे रज्जुरवरुण्या मेवैना मेतद्रास्नां कृत्वा पर्यस्यति * ॥ १३ ॥

अथ चतस्र ऊर्ध्वाः करोति । तूष्णी मेव दिशो हैव ता एतद्वै देवा इमांल्लोकानुखां † कृत्वा दिग्भिः सर्व्वतो दृᳪहस्तथैवैतद्यजमान इमांल्लोकानुखां कृत्वा दिग्भिः सर्व्वतो दृᳪहति ॥ १४ ॥

ता एता ऐतव्यै भवन्ति । एतद्वा एता एता मस्तभ्नुवंस्तथैवैना मेतत् स्तभ्नुवन्ति तद्यद्त ऊर्द्ध्वं तद्देतया तिरश्च्या दृढ मथ यदतोर्व्वांक्तदेताभिः ॥ १५ ॥

तासा मग्रेषु स्तनानुन्नयन्ति । एतद्वै देवा इमांल्लोकानुखां कृत्वैतैः स्तनैः सर्व्वान् कामानदुह्रत तथैवैतद्यजमान इमांल्लोकानुखां कृत्वैतैः स्तनैः सर्व्वान् कामान् दुहे ‡ ॥ १६ ॥

सैषा गौरेव § । इमे वै लोका उखेमे लोका

* 'पर्यस्यति'—इति ख ।

† 'इमाᳪल्लोका०'—इति ग घ

‡ 'दुहे'—इति ग, 'दुहे'—इति

§ 'गौरेव'—इति ग, घ ।

गौस्तस्या ऽएतद्रूपं यैषा तिरश्ची रास्ना सा त्रि-तृतीये भवति त्रितृतीये हि गोरूधः ॥ १७ ॥

तस्यै स्तनानुन्नयति । अधस्तात् स्तनानुन्न-यति सा चतुस्तना भवति चतुस्तना हि गौ * ॥ १८ ॥

ताᳫं हैके द्विस्तनां कुर्व्वन्ति । अथो ऽअष्ट-स्तनां न तथा कुर्याद्ये वै गो कनीयस्तनाः पशवो ये भूयस्तना अनुपजीवनीयतरा वा ऽअस्यैते ऽनुपजीवनीयतराᳫं हैनां ते कुर्व्वतेऽथो ह ते न गां कुर्व्वते शुनीं वाविं वा वडवां वा तस्मात्तथा न कुर्यात् ॥ १९ ॥

अथास्यै बिल मभिपद्यते । अदितिष्टे बिलं गृभ्णात्विति वागवा ऽअदितिरेतद्वा ऽएनां देवाः कृत्वा वाचादित्या निरष्ठापयंस्तथैवैना मय मेतत् कृत्वा वाचादित्या निष्ठापयति ॥ २० ॥

तां परिगृह्य निदधाति । कृत्वाय सा महीं मुखा मिति कृत्वाय सा महती मुखा मित्येतन्

---

* 'गौः'—इति ग, घ ।

मृन्मयीं योनि मग्नय ऽइति मृन्मयी ह्येषा योनि-रग्ने पुत्रेभ्य. प्रायच्छदृदिति अपयानित्येतद्वा ऽएना मदितिः कृत्वा देवेभ्यः पुत्रेभ्यः श्रपणाय प्रायच्छत्तथैवैना मय मेतत् कृत्वा देवेभ्य. श्रपणाय प्रयच्छति ॥ २१ ॥

ता हैके तिस्रः कुर्व्वन्ति । त्रयो वा ऽइमे लोका इमे लोका उखा इति व्वदन्तोऽथो अन्यो ऽन्यस्यै प्रायश्चित्त्यै यद्येतरा भेत्स्यतेऽथेतरस्या भरिष्यामो यद्येतराथेतरस्या मिति न तथा कुर्याद्यो वा ऽएष निधिः प्रथमोऽयꣳ स लोको यः पूर्व्व उद्धिरन्तरिक्षं तद्य उत्तरो द्यौ साथ यदेतच्चतुर्थं यजुर्दिशो हैव तदेतावद्वा ऽइदꣳ सर्व्वं यावदिमे च लोका दिशश्च स यदन्योपाहरेदति तद्रेचयेद्यद्वै यज्ञेऽतिरिक्तं क्रियते यजमानस्य तद् द्विषन्तं भ्रातृव्य मभ्यतिरिच्यते यद्वु भिन्नायै प्रायश्चित्ति-रुत्तरस्मिंस्तदन्वाख्याने ॥ २२ ॥ ७ ॥

॥ इति तृतीयप्रपाठके सप्तमं ब्राह्मणम् [५. २.] ॥

अथोखाया अधस्तात् पर्याप्तमृत्पिण्डादानं विधत्ते— "यावन्तं मृत्पिण्ड मिति। 'निधि' नाम उखाया अधस्तलम्, तस्मै, 'यावन्त' पर्याप्त 'मन्यते' यजमान, तावन्तम् आददीत। उखाकरणे यजमान कर्त्ता। तथाच कात्यायन— "यजमान उखां करोति मृद मादाय मखस्य शिर इति"–इति *। आदाने मन्त्रं विधत्ते— "मखस्य शिरोऽसीतीति †। एतद् यजुर्व्याचष्टे— "यज्ञो वै मख इति। यथा आहवनीयो यज्ञस्य शिर, अग्न्याधारत्वात्, एव मृत्पिण्डोऽपि वह्न्याधारत्वात् आहवनीयस्य चीयमानत्वाच्च लक्षणया यज्ञशिर इत्युच्यते ॥ १ ॥

प्रकारान्तरेण स्तोतु मनुवदति— "यद्देवाह मखस्येति। इष्टकाभिश्चीयते इति यत्, तत् एषोऽग्निर्जायते। चयन नाम अग्नेरित्यर्थं। लोके ह्युत्पद्यमान पुरुष प्रथम 'शीर्षत' शिर प्रभृतिक एव 'चीयते' जायते। एव मग्नि शीर्षतो जायता मित्यभिप्रायेण "यज्ञस्य शिरोऽसि"–इत्युक्तम्। 'जायाते'–इति जने पञ्चमलकारे रूपम् ॥ २ ॥

तत्र प्रथन समन्त्र विधत्ते— "त प्रथयतीति ‡। 'प्रथयति' विस्तारयति। उखा नाम लोकत्रयात्मिकेति स्तुता, तत्र 'निधि' भूलोक, उत्तरत्र "द्यौर्मूर्ध उद्विधारयेति श्रवणात् §। उत्तरोत्तरमृत्पिण्डप्रक्षेपौ अन्तरिक्षद्युलोकात्मकौ, अतो मन्त्रत्रयेऽपि लोकत्रयवाचकानि पदानि विद्यन्ते। यथा,

* का० श्रौ० सू० १६ ३ १३।

† वा० स० ११ ५७ २।

‡ का० श्रौ० सू० १६ ३ २६।

§ एतस्मिन्नेव ब्राह्मणे पञ्चमकण्डिका (२६१ पृ० १२ पं०) द्रष्टव्यम्।

निधिप्रथममन्त्र एव माम्नायते—

"वसवस्त्वा कृण्वन्तु गायत्रेण च्छन्दसाऽङ्गिरस्वद् ध्रुवासि पृथिव्यसि धारया मयि प्रजाᳪ रायस्पोष गौपत्यᳪ सुवीर्यᳪ सजातान् यजमानाय"–इति * ।

अय मर्थ ,—'वसव' नाम भूलोकरक्षका देवा 'त्वा' त्वाम् उखां भूलोकात्मिकां 'कृण्वन्तु' कुर्वन्तु 'गायत्रेण छन्दसा' सह 'अङ्गिरस्वत्' प्राणवत्, हे उखे। 'ध्रुवा असि' स्थिरा असि, 'पृथिवी' भूलोकात्मिका च भवसि। "धारया मयि"–इति यजु - श्शेषेण यजमाने आशिष माशास्ते, यजमानाय मयीतिसप्तमीनिर्देशात्। 'यजमानाय'–इति सप्तम्यर्थे चतुर्थी। 'प्रजा' 'धारय' स्थापय। 'रायस्पोष' धनपुष्टिम्, 'गौपत्य' गवां पतित्वम्, 'सुवीय' सुवीराणां कर्म, अथ 'सजातान्' समानोदरे जातान् भ्रातॄनपि। धारयेति सर्वत्र सम्बन्ध ॥

मन्त्र व्याचष्टे,—"अयं हैष लोको निधिरिति। 'एष' भूलोक 'निधि' उखाया अधस्तनम्। तदेतत् यथा 'वसवोऽकुर्वन्', एवं यद्यापि वसव इति पाठेन भूलोक मेव कृतवान् भवति। ध्रुवासीत्यस्य व्याख्यानं स्थिरासीति, तस्य व्याख्यान प्रतिष्ठितासीति। पृथिव्यसीत्यस्य व्याख्यान पृथिवी ह्येष निधिरिति। निधिर्नामोखाया अधस्तन मिति प्रागुक्तम् †। धारयामीत्यादिना यजमानस्य स्वाशीराशासनम् ॥

उत्तरत्रोखाया ऊर्ध्वपरिमाण वक्ष्यते ‡, अत्र निधेस्तिर्यग्-

---

* वा० सं० ११ ५८ १।

† प्रथमकण्डीव्याख्याने (२६७ पृ० २ प०) द्रष्टव्यम्।

‡ अर्द्धमकण्डीद्रष्टव्यम् (२६९ पृ० १६ प०)।

विस्तारस्य परिमाणं विधत्ते— "तां प्रादेशमात्रीं मिमि । 'ता' मिति पर्याप्ता मृदं तिर्यक् 'प्रादेशमात्रीं कृत्वा' 'अथ' अनन्तरम् 'अस्यै' अस्या विस्तारितायां निधेर्मृद 'सर्वत' 'तीरम्' अन्तम् 'उन्नयति' उर्द्धं कुर्यात् । तथाच सूत्रम्— "वसवस्त्वेति प्रथयत्यन्तानुन्नीय सर्वत"—इति * ॥ ३ ॥

अथ तिर्यक् प्रादेशमात्र विस्तारितायां निधिमृद उपरि मृत्पिण्डप्रक्षेपमन्त्र विधत्ते— "अथ पूर्वं भुवि मादधातीति । 'पूर्व' प्रथमम् । 'उखि' शब्दो मृत्पिण्डप्रक्षेपवाची । अत एव कात्यायन — "प्रथम धातु मादधाति"—इत्युक्तवान् † । धातुशब्द उत्तरोत्तरक्रमेणावस्थान माह, "त्रिधात्वलाबुपात्रम्"—इत्यादिप्रयोगदर्शनात् ‡ ॥

अथ द्वितीयमन्त्र एव माम्नायते— "रुद्रास्त्वा कृण्वन्तु त्रैष्टुभेनच्छन्दसाऽङ्गिरस्वद् ध्रुवास्यन्तरिक्ष मसि धारया मयि प्रजाꣳ रायस्पोष गौपत्यꣳ सुवीर्यꣳ सजातान् यजमानाय"—इति § ।

मन्त्रस्याय मर्थ ,— हे उखे । त्वा 'रुद्रा ' अन्तरिक्षाभिमानिन 'कृण्वन्तु' । अत्र मन्त्रे 'त्रैष्टुभेन छन्दसा'—इति, 'अन्तरिक्ष मसि'—इति च विशेष । शेष पूर्ववत् । निधेर्भूलोकात्मकत्वादुपरिनिहितमृत्पिण्डस्यान्तरिक्षलोकात्मकत्वम् । मन्त्रव्याख्यापक ब्राह्मण मपि पूर्ववत् ।

---

* का० श्रौ० सू० १६ ३ २६, २७ क ।

† का० श्रौ० सू० १६ ३ २७ ख ।

‡ धातुशब्दाभ्यन्तरेप एव । प्रथितस्य तलप्रान्तानुन्नीय कर्त्तॄन् गमयति, धातु प्रथमपिण्डिकाम् का० श्रौ० सू० वृ० ।

§ वा० स० ११ ५८. २ ।

"संलिप्येति । तां निधेवपरिनिष्ठिता मृद 'संलिप्य' सम्यगार्द्रां 'संश्लक्ष्णां' श्लक्ष्णां स्निग्धां कुर्यादित्यर्थ * ॥ ४ ॥

अथ प्रथमोद्धेरुपरि अन्यमृत्पिण्डप्रक्षेप समन्त्रं विधत्ते—"अथोत्तर मुद्धि मादधातीति † ।

अथ तृतीयमन्त्र एव माम्नायते—

"आदित्यास्त्वा कृण्वन्तु जागतेनच्छन्दसाऽङ्गिरस्वद् ध्रुवासि द्यौरसि धारया मयि प्रजाᳪ रायस्पोष गौपत्यᳪ सुवीर्यᳪ सजातान् यजमानाय"–इति ‡ ।

अत्र आदित्या द्युलोकाभिमानिनो देवता त्वा मुखा कुर्वन्तु । अत्र 'जागतेन छन्दसा'–इति, 'द्यौरसि'–इति च विशेष । शेषं पूर्ववत् । प्रथमोद्धेरन्तरिक्षात्मकत्वात् तस्योपरि विहितमृत्पिण्डस्य द्युलोकात्मकत्वम् ॥ ५ ॥

अथ निधेवद्धिद्वयस्य च समीकरण समन्त्र विधत्ते— "अथैतेन चतुर्थेनेति § । उक्तमन्त्रत्रयापेक्षया एतस्य यजुषश्चतुर्थत्वम् । 'वैश्वानरा' विश्वनरसम्बन्धिनो 'विश्वेदेवा' त्वाम् 'आनुष्टुभेन छन्दसा' कुर्वन्ति । "दिशो हैतद्यजुरित्यादेरय मर्थ, ,—उखाया लोकत्रयात्मकत्वात् 'एतेन' 'यजुषा' समीकरणेन तस्या दिश एव निहितवन्तो भवन्ति ।

सोऽय चतुर्थो मन्त्र —

"विश्वे त्वा देवा वैश्वानरा कृण्वन्त्वानुष्टुभेनच्छन्दसाङ्गिरस्वद्

* का० श्रौ० सू० १६ ३ २८ क ।

† का० श्रौ० सू० १६ ३ २८ ख ।

‡ वा० स० ११ ५८ २ ।

§ का० श्रौ० सू० १६ ३ २९ ।

ध्रुवासि दिशोऽसि धारया मयि प्रजाᳯ रायस्पोषं गौपत्यᳯ सुवीर्यᳯ सजातान् यजमानाय''–इति * ।

अत्र मन्त्रे 'आनुष्टुभेन छन्दसा'–इति, 'दिशोऽसि'–इति च विशेष ॥ ६ ॥

पूर्वम् "अथैतेन चतुर्थेन यजुषा करोतीति क्रियासामान्य मुक्तम्, तद् विशिनष्टि–– "तेनैतेनान्तरतश्च बाह्यतश्चेति । 'अन्तरत' उखिहृदयस्य मध्यदेशे अपरिमित छिद्र कुर्यात्, 'बाह्यत' अपि निम्नोन्नतत्वपरिहारेण सर्वत सम कुर्यात् । एतस्य यजुषो दिगात्मकत्वात्, उखायाश्च लोकत्रयात्मकत्वात्, 'एतेन' अन्तरतो बाह्यतश्च समीकरणेन लोकत्रयस्य मध्ये बहिश्च 'अपरिमिता दिश' निहितवान् भवति ॥ ७ ॥

उखाया ऊर्ध्वपरिमाण विधत्ते–– "तां प्रादेशमात्रीं मिमि। एवकारेण परिमाणान्तरनिवृत्ति । ऊर्ध्वा यथा प्रादेशमात्री, तिरश्चीनापि प्रादेशमात्री † । तिर्यक् प्रादेशमात्रीति निधिप्रथनसमये प्रागुक्तम् ‡ । ऊर्ध्वतिर्यक् समा कार्येत्यर्थ ।

तत्परिमाण प्रशसति–– "प्रादेशेति । 'योनि' गर्भस्हशी कृतवान् भवति । उखाया योनित्वम् अग्न्याधारत्वात्, अग्नेश्च गर्भत्वम् तन्मध्ये सवत्सर मवस्थानात् ॥ ८ ॥

सर्वथोखा प्रादेशमात्री कर्त्तव्येत्याह–– "सा यदीति । 'यदि' 'सा' उखा 'प्रादेशाद्' 'वर्षीयसी' अधिकपरिमाणा 'स्यात्', तर्हि 'एतेन' "विश्वे त्वा देवा ''–इति 'यजुषा' 'ह्रसीयसीम्' अधि-

* वा० स० ११ ५८ ३ ।

† का० औ० सू० १६ ३ २४ ।

‡ २६ पृ० १३ प०, २६६ पृ० १ प० द्रष्टव्ये ।

कांश परिहृत्य प्रादेशमात्रीमेव कुर्यात् । 'यदि' उखा 'ऋसीयसी' स्यात्, 'एतेन' यजुषा तिर्यग् प्रादेशसम्मितामेव कुर्यात् ॥ ९ ॥

उखाया परिमाणं पश्वनुष्ठानापेक्षया विकल्पितमिति दर्शयति— "स यद्येक पशु स्यादिति । एकपशुपक्षे एव प्रादेशमात्री उखा कर्त्तव्या, पञ्चपशुपक्षे पञ्चप्रादेशपरिमाणा, इषुमात्री वा कर्त्तव्या । एतत् परिमाणद्वय तिर्यगपेक्षया, ऊर्द्ध्वपरिमाण त्वत्रापि एकप्रादेशमात्रीति । तथा च कात्यायनेन सूत्रितम्— "प्रादेशमात्री तिर्यगूर्द्ध्वञ्च, पञ्चप्रादेशा मिषुमात्री वा तिर्यक् पञ्चपशौ"–इति * । तिर्यगेव पञ्चपशुपक्षे परिमाणद्वयम्, ऊर्द्ध्वन्तु एकप्रादेशैवेत्यर्थ ॥ १० ॥

अथोखाया उत्तरभागे वर्त्तिकरण विधत्ते— "अथ तिरश्चीमिति † । 'पर्यस्यति' परित सर्वत कुर्यात् । तां रास्ना दिगात्मना स्तौति— "एतद्वै देवा इत्यादिना । पूर्वं 'देवा' यथा 'उखा कृत्वा' 'दिग्भि' दृढामकुर्वन्, एव यष्टा वर्त्तिकरणेन दिग्भिरेव वितता दृढाञ्च कृतवान् भवति ॥ ११ ॥

रास्नाकरणस्य स्थान विधत्ते—"ता मुत्तरे विहृतीय इति ‡ । उखां त्रिधा विभज्य 'उत्तरे' अंशे 'विहृतीये' तृतीयभागादप्यूर्द्ध्वे प्रदेशे उखाकण्ठप्रदेशे वर्त्ति सर्वत तिरश्चीना कुर्यादित्यर्थ. ॥ १२ ॥

मन्त्र विधत्ते—"अदित्यै रास्नासीति § । द्वे वत्ते । 'अदित्यै'

* का० श्रौ० सू० १६ ३ २४, २५ ।

† का० श्रौ० सू० १६ ३ २० ।

‡ का० श्रौ० सू० १६ ३ ३० ख ।

§ वा० स० ११ ५६, १ ।

चदीनाया देवमातु 'राज्ञा' रज्जना 'चसि' 'इति'। राज्ञा-पदस्याभिप्राय माह— "वरुण्या वै यज्ञ इति। पापस्य वरुणो देवतेति प्रागुक्तम् *, राज्ञा 'अवरुण्या' अपापत्वात् ॥ १३ ॥

अन्यास्चतस्रो वर्त्तीर्विधत्ते— "अथ चतस्र उर्ध्वा इति। 'तूष्णीम्'-इति मन्त्रप्रतिषेध। एता वर्त्तय उखायाश्चतुर्दिशं कार्या। तथाच सूत्रम्— "उर्द्धास्तूष्णीं प्रतिदिश चतस्रोऽपरा वर्त्तीं प्राग्रा"-इति †। कण्ठगतवर्त्तिपर्यन्त प्रतिदिशं चतस्र तुष्णीं कार्या इत्यथ। राज्ञाचतुष्टय दिगात्मना स्तूयते— "दिशो वै ता इत्यादिना। उर्द्धामा चतसृणा तृतीयोत्तर-कृतराज्ञापयन्तम् ॥ १४ ॥

ता विधत्ते— "ता एता एतस्यै भवन्तीति। "तद्यदत उर्ध्वं मिति। उत्तरवर्त्तिकरणेन अतो लोका उर्द्धचितं सर्व दृढं भवति। उखाया लोकत्रयात्मकत्वात् दार्ढ्यार्थ वर्त्तय कर्त्तव्या इति तात्पर्यम् ॥ १५ ॥

अथोर्द्धवर्त्तीना मन्ते स्तनोन्नयनं विधत्ते— "तासा मग्रेषु स्तनाविति ‡। स्तना इव 'स्तना', तदाकारा कुर्यादित्यर्थ। "एतद्वै देवा इत्यादे कण्डिकात्रयस्याय मर्थ,— पूर्व देवा लोकत्रयात्मिका गोरूपा मुखा कृत्वा तस्या ऊध स्थानीयाया त्रितीयभागे कृतायास्तिरश्चीनाया राज्ञाया समीपे वर्त्तिराज्ञा-ग्रेषु चतुर स्तनान् कृत्वा, तेभ्य सर्वान् कामान् दुग्धवन्त,

* पुरस्तात (२ भा० २७३ पृ० ३ प०) द्रष्टव्यम्।
† का० श्रौ० सू० १६ ३ ३१।
‡ का० श्रौ० सू० १६ ४ १।

तथायं यष्टापि स्वाभिलषितान् कामान् दोग्धु चतुर स्तनान् कुर्यादिति । गोदृष्टोऽपि विहतीयभागी भवति, सापि गौश्चतुस्तनीति तत्साम्यम् ॥ १६, १७, १८ ॥

चतुस्तनपक्षं सिद्धान्तयितु शाखान्तरानुसारेण पक्षान्तर मनुवदति— "ता हैक इति *। तथाच तैत्तिरीया — "द्वि-स्तनां करोति द्यावापृथिव्योर्दोहाय, चतुस्तनां करोति पशूनां दोहाय, अष्टस्तनां करोति छन्दसां दोहाय"—इति †। द्विस्तनपक्षे एकस्मिन्नेव वर्त्त्यग्रे क्रियते स्तनद्वयम्, अष्टस्तनपक्षे एकैकस्मिन् वर्त्त्यग्रे द्वौ द्वाविति। तत्पक्षद्वय दूषयति— "न तथा कुर्यादिति। 'ये' पशवो 'गो' पशोरपेक्षया 'कनीय-स्तना'' अल्पस्तना, 'ये' च 'भूयस्तना', अल्पभूयस्त्वे गवा-पेक्षयेति वक्तु गोरित्युक्तम्। सा हि चतुस्तना। स्तनचतुष्टया-दर्वाक्स्तना भूयस्तना वा ये पशव', ते 'अनुपजीवनीया' अभोग्या भवन्ति। यदि 'एनाम्' उखां द्विस्तनां अष्टस्तनां वा कुर्यात्, तर्हि अनुपजीवनीयां भोगानर्हा मेव कुर्यु, न तु ता भोग्याम्। अभोग्या मेव दर्शयति— "शुनी मिति। अष्ट-स्तनकारणे 'शुनीं' श्वान स्त्रियम्, द्विस्तनकरणे 'अवि वडवां वा' स्तनवन्तीं भवन्ति। ता यथा भोग्या न भवन्ति, एवं द्विस्तना अष्टस्तना वा उखा न भोगार्हेति तथाकरण मयुक्त मित्यर्थ ॥ १९ ॥

विधत्ते— "अथास्यै बिल मिति ‡। 'बिलं' कण्ठविवरम्

---

* का० श्रौ० सू० १६ ४ २।

† तै० सं० ५ १ ६ २६—२८।

‡ का० श्रौ० सू० १६ ४ ३।

'अभिपद्यते' गृह्णाति। मन्त्रं विधत्ते— "अदितिष्ट इति *। हे उखे। 'ते' 'बिलम्' अदिति गृह्णातु। इत्यर्थोभ्र्भं †। अदितिर्वाग्रूपत्वेन स्तूयते— "वाग् वा अदितिरिति। "निष्ठापयतीति। निष्ठिता परिसमाप्ता करोति ॥ २० ॥

उखानिधान समन्त्र विधत्ते— "ता परिगृह्णेति ‡। 'परिगृह्य' दृढा गृहीत्वा निदध्यात् 'ताम्' उखाम्।

मन्त्रस्याय मर्थ,— 'सा' अदिति 'मही' भूरूपा महतीं वा 'मृन्मयीं' मृद्विकारभूताम् 'अग्नये' अग्न्यर्थं 'योनिं' स्थानम् उखा 'खनाय' "खनो यक्" § खनित्वा 'पुत्रेभ्य' प्रयच्छतु, पक्वां कुर्वन्तु इति। अतो हेतो 'अदिति स्वपुत्रेभ्यो देवेभ्य' प्रायच्छदिति सम्बन्ध। अयते पञ्चमलकारे रूपम् ॥

मन्त्र प्रतिपाद मनूद्य व्याचष्टे— "खनाय सा मही मुखामिति ‖ ॥ २१ ॥

उखा एकैव करणीयेति विवक्षयितु केषाञ्चित् पक्ष सोपपत्तिक मनुवदति— "ता हैके तिस्र कुर्वन्तीति ¶। 'ता' उखा, 'एके' आचार्या 'तिस्र' कुर्वन्ति। तत्र युक्ति— "त्रयो वा इमे लोका इति। उखा खलु लोकात्मिका, 'लोका' च 'त्रय', अतो लोकसङ्ख्यया उखा कर्त्तव्या 'इति' 'वदन्त'

* वा० स० ११ ५६ २।
† मा० ८ २ ३२ सू० १ वा०।
‡ का० श्रौ० सू० १६ ४ ४।
§ पा० सू० ७ १ ४७।
‖ वा० स० ११ ५६ ३।
¶ का० श्रौ० सू० १६ ४ ५।

एवं तिस्रः कुर्वन्तीति सम्बन्धः । युक्त्यन्तर माह— "अथो अन्योऽन्यस्या इति । यदि एका भिद्येत, तर्हि अन्यस्यां मग्निं भरिष्याम । "यद्दीतराधेतरस्या मिति । अतोऽन्योऽन्यस्यै प्रायश्चित्यर्थं तिस्र उखाः कर्त्तव्या इत्यर्थः ।

तं पक्षं दूषयति— "यो वा एष निधिरित्यादिना । निधिरेकः , उखिद्वयञ्च , भूलोकादि त्रयम् , दिशश्च सर्वं जगत् , न ततोऽतिरिक्त मस्ति । अतो लोकत्रयात्मिकायां मुखायां कृतायाम् *, 'यद्' यदि अन्यदुखाद्वयम् 'उपाहरेत्' सम्पादयेत्, तर्हि 'तत्' लोकादिकम् अति-'रेचयेत्' , 'यद् यज्ञे ऽतिरिक्तं क्रियते', 'तत्' अतिरिक्तं कर्म 'यजमानस्य द्विषन्तम् एवातिरेचितवान् भवति । यतो न्यून मतिरिक्तञ्च कर्मदोषाह मेव , अतो न्यूनाधिकदोषौ परिहार्यौ । तस्मात् लोकत्रयात् दिग्भ्यश्चातिरिक्तस्य वस्तुनः करणं न युक्त मिति तात्पर्यम् ।

यद्युखैका स्यात् , सा यदि भिद्येत, तर्हि किं मन्यकरणं तूष्णीं वावस्थानम् ? अकरणे च कथ मुख्याग्निधारणम् , असत्यग्निधारणे कथं चयनाख्यं कर्म सेत्स्यतीत्याशङ्क्य , तस्य सर्वस्योत्तर ब्राह्मणे वक्ष्यत इत्याह— "यदु भिद्येत प्रायश्चित्तिः , उत्तरस्मिन् तदन्वाख्यान इति । 'अन्वाख्याने' ब्राह्मणे

* "अथोखा मादत्ते द्यौरसि पृथिव्यसीति । उपस्तौत्येवैना मेतन्महयत्येव यदाह द्यौरसि पृथिव्यसीति"—इत्येतस्य सायणीय भाष्य मिदम्— अध्वर्यो समन्त्रक स्योखादान विधत्ते— "अथोखा मिति । उखाया द्युपृथिव्यात्मकत्वस्य कदाचिदप्यसम्भवात् उपस्तुतिमात्र मिद मित्याह— "उपस्तौत्येवेति । साऽपि किमर्थेत्यत आह— "महयत्येवेति । स्तुत्या पूजनं लोके प्रसिद्धम्"—इति १ भा० ४०० पृ० १प्र०

तत्र, वप्स्यत इति। तत्र श्रौतम्— "यद्येवोखा भिद्येत, याभिन्ना नवा स्याच्छुतविली स्यात्, तस्या मेन पर्यावपेत्"— इत्यादि * ॥ २२ ॥ ७ [५ २] ॥

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
माध्यन्दिनशतपथब्राह्मणभाष्ये
षष्ठकाण्डे पञ्चमाध्याये द्वितीयं ब्राह्मणम् ॥

॥ इति षष्ठकाण्डे तृतीयः प्रपाठकः समाप्तः † ॥

---

* उत्तरत्र (६ अ० ४ ब्रा० ८ क०) द्रष्टव्यम् ।

† इतउत्तरं चिह्नं 'कण्डिका ११४'--इति क, 'कण्डिकासंख्या ११४'—इति ख, ग, घ । तत्र १ ब्रा० २६ क०, २ ब्रा० १२ क०, ३ ब्रा० १० क०, ४ ब्रा० १० क०, ५ ब्रा० २२ क०, ६ ब्रा० १२ क०, ७ ब्रा० २२ क० । एतासां सङ्कलनयास्मिन् प्रपाठके समस्तब्राह्मणेषु ११४ कण्डिकाः सम्पन्ना इति ध्रुवम् ॥

अथ

चतुर्थप्रपाठके प्रथम ब्राह्मणम्,

अपि वा

पञ्चमाध्याये तृतीय ब्राह्मणम्।

॥ हरिः ॐ ॥

तस्या एतस्या अषाढां पूर्व्वां करोति। इयं वा ऽअषाढेयं मु वा ऽएषा लोकानां प्रथमासृज्यत तामेतस्या एव मृदः करोत्येषाꣳ ह्येव लोकाना मियं महिषी करोति महिषी हीयं तद्येव प्रथमा व्विता सा महिषी ॥ १ ॥

पादमात्री भवति। प्रतिष्ठा वै पाद इयमु वै प्रतिष्ठा त्र्यालिखिता भवति त्रिवृदीयम्* ॥ २ ॥

अथोखां करोति। इमांस्तल्लोकान् करोत्यथ व्विश्वज्योतिषः करोत्येता देवता अग्निं व्वायु मादित्य मेता ह्येव देवता व्विश्वं ज्योतिस्ता

* 'त्रिवृदीयम्'—इति ग, घ।

एतस्या एव मृदः करोत्येभ्यस्तल्लोकेभ्य एतान् देवान्निर्मिमीते यजमानः करोति आलिखिता भवन्ति चित्रतो ह्येते देवा इत्यधिदेवतम् *॥ ३ ॥

अथाध्यात्मम्। आत्मैवोखा वागषाढा तां पूर्वां करोति पुरस्ताद्धीय मात्मनो वाक्ता मेतस्या एव मृदः करोत्यात्मनो ह्येवेय वाङ्महिषीं करोति महिषी हि वाक् आलिखिता भवति चेधाविहिता हि वागृचो यजूꣳषि सामान्यथो यदिदं त्रयं वाचो रूप मुपाꣳशु व्यन्तरा मुच्चै † ॥ ४ ॥

अथोखा करोति। आत्मान तत् करोत्यथ विश्वज्योतिषः करोति प्रजा वै विश्वज्योतिः प्रजा ह्येव विश्वं ज्योतिः प्रजनन मेवैतत् करोति ता एतस्या एव मृदः करोत्यात्मनस्तत् प्रजां निर्मिमीते यजमानः करोति यजमानस्तदात्मनः प्रजां करोत्यनन्तर्हिताः करोत्यनन्तर्हिता तदात्मनः प्रजा करोत्युत्तराः करोत्युत्तरां तदात्मनः प्रजा करोति

* '०देवतम्'—इति ग, घ।

† 'मुच्चैः'—इति ग, घ।

न्यालिखिता भवन्ति चित्रद्धि. प्रजातिः पिता माता पुत्रोऽथो गर्भ उल्व जरायु ॥ ५ ॥

ता एता यजुष्कृतायै करोति । अयजुष्कृताया ऽइतरा निरुक्ता एता भवन्त्यनिरुक्ता इतराः परिमिता एता भवन्त्यपरिमिता इतरा. ॥ ६ ॥

प्रजापतिरेषोऽग्नि. । उभयम्वेतत् प्रजापतिर्निरुक्तश्चानिरुक्तश्च परिमितश्चापरिमितश्च तद्या यजुष्कृतायै करोति यदेवास्य निरुक्त परिमितꣳ रूप तदस्य तेन सस्करोत्यथ या अयजुष्कृतायै यदेवास्यानिरुक्त मपरिमितꣳ रूप तदस्य तेन संस्करोति स ह वा ऽएतꣳ सर्व्वं कृत्स्न प्रजापतिꣳ संस्करोति य एव व्विद्वानेतदेवं करोत्यथोपशयायै पिण्ड' परिशिनष्टि प्रायश्चित्तिभ्यः * ॥ ७ ॥

अथैना धूपयति । श्लेष्मैन्वेवाथो कर्मणः प्रकृततायै यद्वेव धूपयति शिर एतद्यज्ञस्य यदुखा प्राणो धूमः शीर्षंस्तत् प्राणं दधाति ॥ ८ ॥

अश्वशकैर्धूपयति । प्राजापत्यो वा ऽअश्वः

* 'प्रायश्चित्तिभ्यः'—इति क , ख ।

प्रजापतिरग्निर्नो वा आत्मात्मानꣳ हिनस्त्यहिꣳ-सायै तद्दै शक्नैव तद्धि अग्ध यातयाम तथो ह नैवाश्वꣳ हिनस्ति नेतरान् पशून् * ॥ ९ ॥

वसवस्त्वा धूपयन्तु । गायत्रेणच्छन्दसाङ्गि-रस्वद् रुद्रास्त्वा धूपयन्तु त्रैष्टुभेनच्छन्दसाङ्गिरस्वदा-दित्यास्त्वा धूपयन्तु जागतेनच्छन्दसाङ्गिरस्वद् विश्वे त्वा देवा वैश्वानरा धूपयन्त्वानुष्टुभेनच्छन्दसाङ्गि-रस्वदिन्द्रस्त्वा धूपयतु वरुणस्त्वा धूपयतु विष्णुस्त्वा धूपयत्वित्येताभिरेवैना मेतद्देवताभिर्धूपयति † ॥ १० ॥

सप्ताश्वशफानि भवन्ति । सप्त यजूꣳषि सप्त-तय्य एता देवता सप्त शीर्षन् प्राणा यद्‌ वा ऽअपि बहु कृत्व· सप्त-सप्त सप्तैव तच्छीर्षण्येव तत् सप्त प्राणान् दधाति ॥ ११ ॥ १ ॥

॥ इति चतुर्थप्रपाठके प्रथमं ब्राह्मणम् [५ ३] ॥

* 'पशून्'—इति ग, घ ।

† अत्र 'गायत्रेणच्छन्दसा, 'त्रैष्टुभेनच्छन्दसा', 'जागतेनच्छन्दसा', 'आनुष्टुभेनच्छन्दसा'—इत्येव पाठेन भवितव्यम् "छे च"—इति (६ १ ७३) पाणिनिशासनात्, अस्त्येवाद्य संहितेति । पूर्वभाष्येव मेव बोध्यम् (२६०, २६१, २६२ पृ०) ।

अथ संस्कृतायाः मृदः सकाशात् उखानिर्माणात् पूर्वं अषाढाख्येष्टकाया निर्माणमाह—"तस्या एतस्या अषाढां पूर्वां करोतीति *। 'अषाढा' अषाढलिङ्गकमन्त्रोपधेया मिष्टकाम्। "तद्दानामसु पधानो मन्त्र इतीष्टकासु लुक् च मतो"—इति † मतोर्लुक्। 'पूर्वाम्' उखात पूर्वभाविनीं कुर्यात्। पूर्वभावित्व मर्थवादमुखेन दर्शयति— "इयं वा अषाढेति। 'अषाढा'—इति या अस्ति, सा 'इयम् वै' पृथिवी खलु, तद्विकारत्वात्। अस्त्वेवम्, प्राथम्ये किं मायात मित्यत आह— "इयं मु वा एषां लोकानां प्रथमासृज्यतेति। पृथिव्या इतरलोकापेक्षया प्राथम्यं प्रसिद्धम्। अस्याः मृदन्तरप्रकृतित्वप्रसक्तिं वारयति— "ता मेतस्या एवेति। 'एतस्याः' उक्तसंस्कारोपेतायाः मृदः सकाशादित्यर्थः। तत्रोपपत्ति माह— "एषा ह्येव लोकाना मिय मिति। यत 'इयम्' 'एषां' प्रसिद्धानां लोकानां सम्बन्धिनी, अत इत्यर्थः। अय मभिप्रायः,— उखाया लोकत्रयात्मकत्वेन प्रतिपादनात् तस्या या प्रकृतिभूता मृत्, तदीयाया एवाषाढाया अपि निर्माणे सत्येव तदीयत्व भवतीति।

अस्या उखावद् यजमानकर्तृत्व प्राप्त मित्याह— "महिषी करोतीति। प्रथमोढा स्त्री महिषी, 'इयम्' इष्टकापि 'हि' यस्मात् 'महिषी', प्रथमतो निर्माणात्, अतोऽस्यां महिषीकर्तृकता युक्ता। भवत्वेव यद्येषा महिषी स्यात्, सैव कुत इत्यत आह— "तद् येव प्रथमा वित्ता, सा महिषीति। 'वित्ता' लब्धा ॥ १ ॥

* का० श्रौ० सू० १६ ४ ६

† पा० सू० ४ ४ १२५ ।

तस्या इयत्ता माह— "पादमात्री भवतीति । अत्र महिषी-शब्दस्य कर्त्तृत्वेन सम्बन्धात् तत्पादमात्रीति न मन्तव्यम्, सूत्र-कारेण यजमानपादमात्रीति विशेषितत्वात् * । उक्तप्रमाणं प्रशंसति— "प्रतिष्ठा वै पाद इय मु वै प्रतिष्ठेति । पादाभावे पतनदर्शनात् पादस्य प्रतिष्ठात्वम् । इय पृथिवी सर्वाधारत्वात् प्रतिष्ठा, अतस्तद्विकारभूताया अपीष्टकाया प्रतिष्ठात्मकपाद-प्रमाणत्व युक्त मित्यर्थं । अस्याश्चिह्नत्वेन खल्वत य कर्त्तव्य मिति विधत्ते— "त्र्यालिखिता भवति त्रिवृद्धीय मिति । अर्द्ध-चन्द्राकाराभि स्तिस्रभि रेखाभिर्युक्ता भवेत् । 'हि' शब्देन "त्रयो वा इमे त्रिवृतो लोका"–इत्यादि † श्रुत्यन्तरप्रसिद्धि र्द्योतिता । अस्यास्त्रिवृत्त्व पृथव्यप्तेजोभिस्त्रिवृत्कारणाद्वा, सिकता-मृत्तिकापाषाणैस्त्रिभि सहतरूपत्वाद्वा द्रष्टव्यम् । अत्र सूत्रम्— "अषाढा करोति महिषी प्रथमविभा तदाख्या, यजमानपाद-मात्री त्र्यालिखिताम्"-इति ‡ ॥ २ ॥

उखाया अषाढानन्तरकर्त्तव्यता माह— "अथोखा मिति । 'अथ' अषाढानन्तरम्, 'उखा' प्रागुक्तलक्षणा स्थाली पश्चात् कुर्यात् । तत्रोखाकरणेनेमा स्त्रींल्लोकान् कृतवान् भवति । "यजमान उखा करोति मृद मादायेत्यादि § सूत्रम् ॥

अथ विश्वज्योतिर्नामधेयाना तिसृणा मिष्टकाना मुखानन्तर-

* 'यजमानपादमात्रीं त्र्यालिखिताम्"–इति का औ० सू० १६ ३. २२ । 'महिषीपादमात्री माभूदिति यजमानग्रहणम्'—इति तत्र वृत्ति. ।

† ऐ० ब्रा० ४ २ ३ द्रष्टव्यम् ।

‡ का० औ० सू० १६ ३ २१, २२ ।

§ का० औ० सू० १६ ३ २३ ।

कार्त्यायनो विधत्ते— "अथ विश्वज्योतिष करोतीति *। पूर्ववदेतास्विष्टकामन्त्रैरुपधेयत्वात् विश्वज्योतिषनाम आसां द्रष्टव्यम्। एतासां निर्माण मेवाग्निवाय्वादित्यानां निर्माण मित्याह— "एता देवता अग्नि वायु मादित्य मेता ह्येव देवता विश्व ज्योति रिति। 'एता देवता' इत्यस्य व्याख्यानम्— 'अग्निम्, वायुम्, आदित्यम्'-इति। विश्वद्योतकत्व मग्न्यादीना प्रसिद्ध मिति 'हि'-शब्दो द्योतयति। पूर्ववदासा मप्युखार्थ सस्कृतमृत्तिकैव कारण मित्याह— "ता एतस्या एव मृद करोतीति। एतत् प्रशसति— "एभ्यस्तल्लोकेभ्य एतान् देवान् निर्मिमीत इति। उखाया लोकत्रयात्मकत्वस्योक्तत्वात् तदनन्तर तदीयमृदा आसां निर्माण मेव तदधिष्ठातृदेवतानिर्मित मित्यर्थ। "यजमान करोतीति, "तृतीयाश्चिताः भवन्तीति † वाक्यद्वय स्पष्टम्।

देवाना त्रित्वस्य द्युभूम्यन्तरिक्षस्थानभेदेन, "इष्टकासु तिस्रो विश्वज्योतिष पृथग्लक्षणास्तृतीयाश्चिता"-इति ‡ सूत्रम्। पृथग्लक्षणाभिधानम्, द्वितीयतृतीयाना क्रमपरिज्ञानार्थम्, तेन क्रमेणोपधान यथा स्यादिति। "इत्यधिदैवत मिति। 'इति'-शब्द प्रतिपादितप्रकारवचन। 'अधिदैवतम्' देवता अधिकृत्य प्रवृत्तम्, उक्ता मित्यर्थ ॥ २ ॥

'अथ' वक्ष्यमाणम् 'अध्यात्मम्' आत्मान मधिकृत्य प्रवर्त्तमानम्, 'वक्ष्यते'-इति शेष। प्रतिज्ञात मर्थ दर्शयति— "आत्मैवोखा वागग्निरिति। उखायाः प्राधान्यादात्मत्वम्। आत्मा-

---

* का० श्रौ० सू० १६ ४ ६।

† २७६ पृ० २ पं० द्रष्टव्यम्।

‡ का० श्रौ० सू० १६ ४ ६ (तु शब्दार्थे)।

नादिषु प्राणोऽपि पूर्वं वाच स्वरूप मस्ति, 'पुरस्तात्' प्रश्ने प्रसिद्धि माह 'हि' शब्द । न केवल वैदिक्या एव वाचस्त्रैविध्यम्, अपि च 'यदिद' सर्वंव्यवहार्यमात्र 'वाच' 'रूप' स्वरूप मस्ति, तत् 'त्रय' त्रिविधम्— "उपांशु व्यन्तरा सुचै-रिति। व्यन्तरा मिति, उपांशूच्चै स्वरमध्यवर्त्तिनी वाच वदन्ति प्राणिन, तदेकरूप मित्यर्थ । सुगम मन्यत् ॥ ४ ॥

"अथोखा करोतीत्यादिकम्, अधिदैवतवद् व्याख्येयम् । उखाया आत्मरूपत्वात् तदनन्तर तस्या एव सूदो विश्वज्योतिषा सुत्पादने प्रजोत्पादन मित्यर्थ । 'प्रजनन' प्रकृष्ट जनन जन्म यस्मात् प्रजननम्, प्रजा मित्यर्थ । 'अनन्तर्हिता' व्यापारान्तरेणा-व्यवहिता कुर्यात् । उखाया विश्वज्योतिषाश्च मध्ये व्यवधान न कुर्यादिति भाव । तस्यानन्तर्हितत्व मुखात प्राङ् निष्पा-दनेऽपि सम्भवतीत्याह— "उत्तरा करोतीति । 'उत्तरा' उखाया उत्तरभाविनी कुर्यात् । 'अथो गर्भे उल्बं गर्भस्यान्तर-वेष्टनम्, 'जरायु' बहिर्वेष्टनम् ॥ ५ ॥

यदेतासां मन्त्राङ्गत्वमृदोत्पन्नत्वम्, यच्चाषाढादिनामत्वम्, यदपि पादमात्रादिपरिमाणवत्त्वम्, तदेतत् सर्व मितरेष्टकानां वैलक्षण्येनानूद्य स्तौति— "ता एता यजुष्कृतायै करोतीत्या-दिना । 'यजु' मन्त्र, तेन कृता निष्पादिता 'यजुष्कृता' । षष्ठ्यर्थे चतुर्थी, तस्या इत्यर्थ । 'अयजुष्कृतायै' अतथाभूताया मृद 'इतरा' अषाढादिव्यतिरिक्ता, कुर्यात्, 'एता अनि-रुक्ता' अषाढा विश्वज्योतिषो निर्वचनं प्राप्ता * ॥ ६ ॥

* "विश्वशब्दोपेतैश्च मन्त्रैरुपधेया विश्वज्योतिष । ताश्च तिस्र— प्रथममध्यमोत्तमचितिषु उपदध्यात्"—इति तै० सं० ४ ४ ६ सा० भा० ।

"प्रजापतिरेषोऽग्निरिति। 'एष' चयनलक्षण 'अग्नि' 'प्रजापति' सर्वभूतात्मको विराट्। 'निरुक्त' कार्यात्मना स्थितम्', 'अनिरुक्त' कारणात्मना वर्त्तमान मिति विवेक। यन्निरुक्ता-निरुक्ताख्यात्मकत्वम् 'उभयम्' अस्ति, तद् इय प्रजापतिरेव। 'तत्' तथा सति यजुष्कृतोत्पन्नानि प्रजापते 'यत् निरुक्त रूपम्', तत् कार्यात्मक 'परिमितम्', तत् संस्कृतवान् भवति। अतथा-भूताभिरिष्टकाभिरतथाभूत प्रजापते रूप संस्करोति। एव विद्वान् निरुक्तानिरुक्तरूप मुभय जानन् संस्कर्त्ता भवति।

अवशिष्टाया मृदो विनियोग माह— "अथोपशयार्थं पिण्ड परिशिनष्टि प्रायश्चित्तिभ्य इति। उखा क्षत्वा यजमान इति शेष। उपशेते इति 'उपशया' मृदुच्यते *। 'प्रायश्चित्तिभ्य' उखाभेदपरिहारोपाया, तदर्थं मित्यर्थं ॥ ७ ॥

यदुक्त सूत्रकृता— "सप्तभिरश्वसकृद्भिरुखा धूपयति दक्षि-णाग्न्यादीप्तैरेकैकेन वसवस्त्वेति प्रति मन्त्र मिति †, तदिद विधाय प्रशसति— "अथैना धूपयति शीर्ष्णे त्वेवेति। 'शीर्ष्णे त्वेव' स्थिरत्वायैव, न केवल दृष्टार्थम्। 'अथो' अपि च 'कर्मण' उख्यधारणलक्षणस्य चयनस्य वा 'प्रज्ञातताये' संस्कृतत्वसिद्धये। "यद्वेवेत्यादि, धूपनार्थवाद। उखाया प्राधान्यात् शिरस्त्वा-भिधानम्। नासारन्ध्रेण प्राणस्य सञ्चारवत् ० ० ० धूम तस्य-ञ्चारदर्शनात् प्राणत्वोपचार ॥ ८ ॥

"अश्वशकैर्धूपयतीति। धूपनकर्म्म चाश्वसकृद्भिरेव भवितव्य मिति नियमे कारण माह— "प्राजापत्यो वा अश्व इत्यादिना।

* का० श्रौ० सू० १६ ४ ७
† का० श्रौ० सू० १६ ४, ८

"प्रजापतेरक्षि अश्वयत्तत् परापतत् तदश्वोऽभवत्, यदश्वयत् तदश्वस्याश्वत्वम्"–इति श्रुते * प्रजापतेरवयवत्वेन सम्बन्धादश्वस्य प्राजापत्यत्वम्। चीयमानस्याग्ने पिण्डात्मकत्व प्राक् प्रतिपादनात्, संवत्सर प्रजापतिरिति श्रुते संवत्सर मुख्याग्नेर्ह्रीयमाणत्वाद्वा अग्नि प्रजापति। अश्वशकृद्द्वारा धूपन प्रशसति– "तद्वै शकृतेत्यादिना। 'शक्ना'–इति पदे "पद्दन"–इत्यादिना † शकन्नादेश। 'जग्धम' भक्षितम्। अदेर्जग्धादेश ‡। 'यातयाम' कालान्तरगमनम्, गतसार मित्यर्थ। यत एवम्भूतम् अत स्वसम्बन्धिनम् 'अश्वम्' अपि न हिनस्ति' अश्वसम्बन्धित्वेन एतेषा पशूना सम्बन्धाभावादेव हिसाप्रसङ्ग। अतोऽश्वशकैर्धूपन प्रशस्तम् ॥ ८ ॥

अथ प्रथमशक्ना धूपने मन्त्र माह— "वसवस्त्वा धूपयन्तु गायत्रेणच्छन्दसाङ्गिरस्वदिति §। हे उखे। त्वां 'वसव' अष्टसङ्ख्याका 'धूपयन्तु' अश्वशकधूपनेन सस्कुर्वन्तु। कीदृशा वसव? गायत्राख्येन छन्दसा सहिता, 'अङ्गिरस्वत्' अङ्गिरसो यथा स्वकीये चयने 'अधूपयन्', एव मित्यर्थ ‖। वसूनां गायत्रच्छन्दसश्च सम्बन्धे अष्टसङ्ख्यासादृश्य निमित्तम्, अष्टौ हि वसव, अष्टाक्षरा च गायत्री।

एव "रुद्रास्त्वा धूपयन्तु त्रैष्टुभेन"–इत्यादय ¶ अक्षरसङ्ख्या-

* तै० स० ५ ३ १२ १।   † पा० सू० ६ १ ६३।

‡ "अदो जग्धिर्ल्यप्ति किति"—इति पा० सू० २ ४ ३६।

§ वा० स० ११ ६० १ (सप्तमन्त्रात्मिकैषा कण्डी)।

‖ विशेषतस्तत्र २६८ पृ० द्रष्टव्यम्।

¶ वा० स० ११ ६० २।

द्वारेण * व्याख्येयम् । "विश्वे त्वा देवा वैश्वानरा इति चतुर्थ-मन्त्रे † विश्वेषां देवानां सर्वदेवात्मकत्वाद् अनुष्टुभश्च सर्वच्छन्दो-रूपत्वात् परस्परसम्बन्धः । विश्वे च ते नराश्च 'विश्वेनराः', तेषां स्थितकारित्वेन सम्बन्धिनो 'वैश्वानराः' । इन्द्रवरुणविष्णूनां प्रति-नियतच्छन्दःसम्बन्धाभावात् केवला एवाम्नाताः ‡ । "एताभि-र्देवैनां मेतद्देवताभिर्धूपयतीति । 'एतत्' एतेन, वस्वादिमन्त्र-धूपनेन 'एताभिः' सप्तदेवताभिः § एव धूपनं कारितवान् भवति ‖ ॥ १० ॥

शाखामन्त्रदेवतानां यत् सप्तसङ्ख्यासाम्यम्, तत् प्रशंसति— "सप्तात्मशकानि भवन्तीति । सङ्ख्यागतसप्तत्वेषु त्रित्वं प्रशंसति— "यदु वा अपि बहुशत्वं सप्त सप्तेति । 'उ' अपि च, यदपि तत्र शाखागत मेकं सप्तकम्, मन्त्रगतञ्चापरम्, देवतागतं चान्यत् । एवं 'बहुशत्वं' सप्तसङ्ख्याया आवृत्ताया अपि सप्तसङ्ख्यानतिरे-कात् त्रिभिः सप्तभिः 'शीर्षण्येव' उखाख्ये यज्ञशिरस्येव 'सप्त प्राणान्' 'दधाति' स्थापयति ॥ ११ ॥ १ [५ ३]

इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे

माध्यन्दिनशतपथब्राह्मणभाष्ये

षष्ठे काण्डे पञ्चमाध्याये तृतीयं ब्राह्मणम् ॥

* विशेषतस्त्वत्र २६९ पृ० द्रष्टव्यम् ।

† वा० सं० ११ ६० ४ । ‡ वा० सं० ११ ६० ५, ६, ७ ।

§ वसवः, रुद्राः, आदित्याः, वैश्वानराः, इन्द्रः, वरुणः, विष्णुश्चेति सप्त देवाः वा० सं० ११, ६० कण्डिका माम्नाताः ।

‖ इहैव पूर्वत्र २६८ पृष्ठतः २७१ पृष्ठान्तं द्रष्टव्यम् ।